Copies can be had of:—

(1) MESSRS ATMA RAM & SONS
BOOK-SELLERS.
KASHMERE GATE, DELHI.

(2) ORIENTAL BOOK AGENCY
15, SHUKRAWAR PETH,
POONA.

(3) SHIRINIWAS SHASTRI
41, AHILYAPURA, INDORE CITY.

Tales from

VETALA PANCHA VIMSHATIH

RETOLD BY

DR. S. N. SHASTRI, M.A., D.PHIL., LL.B.

Hindu College, Delhi.

AND

PT. H. V. KOCHER, M.A., Vedalankara,

St. Stephen's College, Delhi.

PRESCRIBED AS A TEXT BOOK

By the University of Delhi.

BHARATI PRAKASHANA MANDIRA, DELHI.

Second Edition] 1949 [Price Rs. 1-4-0

Published by:

SHRINIWAS SHASTRY, *Pañca-tīrtha*,
B. A. (Hons.) LL. B.,

BHARATI PRAKASHANA MANDIRA,
41, AHILYAPURA, INDORE CITY.

Branch Office:
17, PARK AREA, KAROLBAGH, DELHI.

Printed at
SRI AUROBINDO ASHRAM PRESS
PONDICHERRY

411/49/2000

PREFACE

(To the First Edition)

In Sanskrit literature *Kathā-sāhitya* is very interesting. It is found both in prose and in poetry. *Guṇāḍhya* is supposed to be the pioneer among the ancient story-writers of India. He is said to have flourished in the court of *Sātavāhana* who ruled over *Pratiṣṭhāna* in the first century A.D.[1] He wrote a story-book called the *Bṛhat-kathā* in the *Paiśacī* dialect which is praised as one of the precious store-houses of Indian literary art. References to his *Bṛhat-kathā* are found in the works of *Subandhu*, *Bāṇa* and *Daṇḍin*, and also of other later writers.

Perhaps to give greater publicity to the stories given in the *Bṛhat-kathā*, *Budhasvāmin* compiled them in the *śloka* form in Sanskrit and entitled his work as *Bṛhat-kathā-śloka-saṁgraha*. Unfortunately his work too is found only in a fragment, which, however, is enough to show that it is faithful to the original and is composed in a simple, clear and fluent style. After the discovery of this work, it becomes more logical

1. Prof. Weber places *Guṇāḍhya* in the sixth Cent. A. D., and Dr. Keith thinks that he is definitely not later than 500 A. D. But Mm. Durgaprasad and K. P. Paraba hold that *Guṇāḍhya* was, beyond doubt, a contemporary of *Sātavāhana* who flourished in 1st Cent. A. D.

to conclude that *Kṣemendra* (11th Cent. A.D.) depended on the *Śloka-saṁgraha* and not on the original *Bṛhat-kathā* for producing his collection of stories known as *Bṛhat-kathā-mañjarī*. *Kṣemendra* has, no doubt, made several adaptations from the original work but has gained little success in being able to add much of interest to his narratives. Relying likewise on the *Śloka-saṁgraha* of *Budhasvāmin*, another work is written by *Somadeva Bhaṭṭa*, which is parallel to the *Bṛhat-kathā-mañjarī*.

Somadeva Bhaṭṭa was the son of *Rāmadeva Bhaṭṭa*, and was born in Kashmere during the reign of *Anantarāja*. He wrote his celebrated work, *Kathā-sarit-sāgara* in order to still the surging mind of *Sūryamatī*, who was the Queen-consort of *Anantarāja* and enlightened princess of *Jālandhara*. The date of his composition is determined by the historians somewhere between 1063—1081 A.D. The *Kathā-sarit-sāgara* has gained wide popularity on account of a large variety of stories written in an elegant and simple style. It is a book of many amusing tales, which narrate wonderful adventures on sea and land. Among these stories, the Cycle of the *Vetāla-pañca-viṁśatiḥ* is a very interesting piece and has become so popular that it forms now a part of folklore in this country.

The story of the *Vetāla-pañca-viṁśatiḥ* refers to an episode in the life of the King Trivikramasena, whose later account reveals that he was none different from Kirg *Vikramāditya*. There was a monk, *Kṣāntiśīla*,

who used to visit his court every day. He always brought with him a fruit as a present to the King, who used to hand it over to his treasurer in attendence. His visits passed on unnoticed for a long period of ten years until at last one day the fruit presented to the King happened to be given to the tame monkey who had crept in the hall due to the carelessness of its guard. The fruit when handled by the ape broke and from within there came out a precious gem. Suspecting that something similar might be the contents of all such fruits previously presented, the King asked his treasurer whether he had preserved all of them. But the treasurer had only put them carelessly in the store-house. At the royal command he went there and came back only to report that no fruit was lying in the store but only a heap of sparkling gems. Finding that a valuable present was thus made every day by the monk, the King got astonished, and the next morning no sooner he called at the court than the King inquired of him the purpose of his costly presents to him. The monk submitted that he had something to be achieved in course of which he stood in great need of some help that could be extended only by such a chivalrous hero as the King himself. After eliciting from the King the promise for rendering such help, the monk told him that if he were indeed willing to grant him the requisite help then he should be pleased to oblige him by his presence in the burning ground at midnight on the fourteenth day of the dark half of the month. The monk took leave of the King as soon as

he agreed to do the same. On the night of the appointed day, the King, accoutred as a warrior, started from his palace unnoticed by others, and reached the burning-ground at the fixed hour. The King reported his presence to the monk who was then busy making preparations for his adorations. The monk was happy to find the King there, and sought his assistance in bringing him the corpse of a person which stood hanging on the branch of a tree. At that frightful hour, the King proceeded alone to the indicated spot and found the corpse there as described. He climbed the tree and dropped down the dead body and then descended. When the King touched it, it burst into peals of laughter which convinced him that the corpse was indwelt by a ghoul (*Vetāla*). The King scolded him for his laughter and asked him to go along with him. He then put the corpse on his shoulder and began to return. The ghoul complimented the King for his efforts and to relieve him of the tedium of his task volunteered to tell him an interesting tale. At the end of the tale, the ghoul put him a question and conjured him to answer the same. He further accursed the King that his head would shatter into pieces in case he refused to answer the question knowingly. The King gave him a suitable reply and he suddenly disappeared from the King's shoulder and went back to the tree. The King, resolute in his purpose, pursued the ghoul and once again put him on his back. The ghoul would once again tell him a story, put some question at the end of his narration, and remind him of the penalty for his deliberate

refusal to answer the question. The King would give an appropriate answer and the ghoul would once again play the foul with him. Thus it was twenty-four times that the struggle went on until a story was told to the King involving complications in determining relations by marriage. Finding the King then vanquished, the ghoul rejoiced and released the corpse to be taken away by the King with a warning against the risk that attended upon his venture in helping the monk who was out to offer him in sacrifice to the one whom he craved to propitiate. But in appreciation of the King's goodness the ghoul kindly showed him also the way out by which the monk was eventually undone and the glory aspired for by him was gained by the King in his stead.

Thus the twenty-five tales told by the ghoul to the King constitute the *Vetāla-pañca-viṁśatiḥ*. The present work is an attempt to re-tell from the *Kathā-sarit-sāgara* a few select stories forming this Cycle. It contains introduction to the story and also its conclusion. Besides, there are eight more tales, each one having an interrogatory episode at its end. These stories are adapted and reproduced as far as possible in the original language of *Somdeva Bhaṭṭa* presenting a variety of styles of Sanskrit composition. For, there are three popular styles of Sanskrit writings which are distinguished from one another by virtue of simplicity or stiffness depending on the use of soft or hard consonants and absence or presence of compounded words. They are verily known as the *Vaidarbhī*, the *Pāñcālī*

and the *Gauḍī*. Whereas the advanced students of Sanskrit literature have to come across works written in all these styles, it becomes useful to acquaint the under-graduates with easy specimens of the prominent styles. With this view, the first two stories are composed in the popular *Pāñcālī*, the next two in the modest *Gauḍī*, and the rest in the *Vaidarbhī* form. The composition, on the whole, presents here and there some specimens of other minor styles like the *Lāṭī* and the *Avantī* as well. Specimens of easy *alaṅkāras* are occasionally given here to introduce the reader to the Sanskrit figures of speech. In order to make an easy approach to the subject-matter, option is exercised generally in favour of putting disjoined words which may give practice to the students in the formation of the *Sandhis*. *Sandhi* rules are, however, observed somewhat strictly in the stories written in the *Gauḍī* form, and different options are used particularly with a view to affording exercise to the students in disjoining *Sandhis* and acquainting them with the alternate changes provided by the rules.

It is earnestly hoped that the learners will be benefited if their attention is drawn to these peculiarities and if regular exercise is given to them in writing stories in simple Sanskrit. A careful reading and re-reading of these tales will surely train a student in reading classical Sanskrit and also lead him to the original fountains of beautiful stories. These tales were first told, out of affection, by *Siva* to *Pārvatī*, and

it is rightly believed by Somdeva that the regular readers of these stories will, by the grace of *Siva*, become greatly enlightened when he declares,

इदं गुरुगिरीन्द्रजाप्रणयमन्दरान्दोलनात्
पुरा किल कथामृतं हरमुखाम्बुधेरुद्गतम् ।।
प्रसह्य रसयन्ति ये विगतविघ्नलब्धर्द्धयो
धुरं दधति वैबुधीं भुवि भवप्रसादेन ते ।।

Delhi,
Vyāsa-Paurṇimā,
Samvat 2005

S. N. Shastri
H. V. Kocher

PREFACE TO THE 2ND EDITION

We welcome this opportunity of expressing our gratîtude to our readers whose patronage has encouraged us in bringing out the second edition of this booklet within a period of less than a year from the date of its publication. In the second edition a few minor changes are made here and there which, we hope, will tend to increase the interest of the readers. We are extremely thankful to the officers of Sri Aurobindo Ashram Press but for whose kind help such faultless printing of the text could not have been easily possible.

Delhi,
Deva-śayanī,
Vikrama Samvat 2006.

S. N. Shastri
H. V. Kocher

॥श्रीः॥

॥ विषयानुक्रमणी ॥

विषयः		पृष्ठम्
	Preface	i
	कथोपक्रमः	१
१	मन्दारवतीकथा	४
२	शूद्रकवीरवरकथा	७
३	हरिस्वामिकथा	१४
४	सत्त्वशीलकथा	१७
५	धर्मध्वजकथा	२४
६	यशोधनकथा	२७
७	विष्णुस्वामिकथा	३१
८	चन्द्रवतीकथा	३५
	कथोपसंहारः—वेतालसिद्धिः	४०

।

॥ श्रीः ॥

समर्पणम्

तत्रभवतः श्रीभर्तृहरेः

पादपद्मयोर्

यो हि महाकविर्मनीषी

समीक्षासार्वभौमो बभाण—

"अतिगुणवत्यपि काव्ये पिशुनोऽन्वेषयति दूषणानि ।

अतिसुन्दरेऽपि वपुषि व्रणमेव हि मक्षिकानिकरः ॥"



।

VETALA PANCHA VIMSHATIH

।

॥ श्रीः ॥

॥ वेतालपञ्चविंशतिकथाः ॥

कथोपक्रमः

अस्ति गोदानदीतीरे प्रतिष्ठानाभिधानो जानपदः। तत्र पुरा भूभुजो विक्रमसेनस्य सूनुः शक्रविक्रमस्त्रिविक्रमसेनो नाम ख्यातकीर्ति-र्भूपतिर्बभूव। प्रत्यहमास्थानगतस्य तस्य सेवार्थं क्षान्तिशीलो नाम कश्चन भिक्षुः फलमेकमुपाजहार। सोऽपि राजा तत्फलमुपादाय पार्श्व-वर्त्तिनः कोषाधिकारिणो हस्ते न्यस्तवान्।

एवमतीतेषु दशसु वत्सरेषु एकदा महाराजाय यथायथं समर्प्य फलमेकं निर्गते तु भिक्षौ, दैववशात् रक्षिणो हस्तात्परिभ्रष्टाय सभा-मण्डपे प्रविष्टाय क्रीडामर्कटकाय स फलं तत्प्रादात्। फलं तद्यावत् स मर्कटपोतोऽश्नाति तावद्विभिन्नमध्यात् तस्मादनर्घमेकमुत्तमं रत्नं निरगात्। तदवलोक्य रत्नमादाय राजा तं भाण्डागारिकमपृच्छत् "भिक्षुणा नित्यमुपनीतानि यानि फलानि मया तव दत्तानि, तानि त्वया कुत्र स्थापितानि ?" एतन्निशम्य भयाकुलः स कोषाध्यक्षो व्यजि-ज्ञपत् "देव! मया त्वनुद्घाटयैव तानि समग्राणि गवाक्षतो गञ्जे प्रक्षिप्तानि। समादिशति चेन्महाराजः गञ्जमुद्घाट्याहं गवेषयेय"

इति। एवं कर्तुमादिष्टः स कोषाध्यक्षो भाण्डागारात्प्रतिनिवृत्य प्रभुं न्यवेदयत् "देव! शीर्णानि किल सर्वाणि तानि फलानि, नैकमपि तत्र दृश्यते, तत्राहं केवलं रश्मिज्वालावलितं रत्नराशिमेव पश्यामि।" एतदाकर्ण्य भृशं प्रीतो राजा कोषरक्षिणं सर्वाण्येव तानि रत्नानि संरक्षितुं समादिदेश।

परेद्युर्यथापूर्वं समायातं तं श्रमणं राजा सम्बोधयामास, "भिक्षो! किमेवं महता धनव्ययेन मामन्वहमुपतिष्ठसे, नैवाहमधुना ते फलं स्वीकरिष्यामि यावत्त्वं तत्प्रयोजनं मां न भाषसे।" इत्येवं ब्रुवाणं नृपतिं तं विजनं नीत्वा स भिक्षुराह "राजन्! किमपि साधनं ममेष्टं यद् वीरसाचिव्यसापेक्षं किल। तस्मिन्नर्थे वीरप्रमुखेण त्वया क्रियमाणं किञ्चित्साहाय्यं त्वामहमर्थये" इति। एवं ब्रुवते तस्मै श्रमणाय राजा तथेत्युक्त्वा यथाभीष्टं स्वसाहाय्यं प्रतिज्ञातवान्। तेन सन्तुष्टः स भिक्षुर्भूयो भूभृतं तमेवमभाणीत्—"देव! यदि एवमस्यामागामिन्यां कृष्णपक्षस्य चतुर्दश्यां रजनीमुखे महाश्मशानमुपेत्य तत्र वटवृक्षस्याधस्तात् स्थितस्य मम समीपे स्थातव्यम्" इति। "बाढमेवं करिष्यामीति" प्रत्युक्तवति राजनि प्रहृष्टः स श्रमणः स्वनिलयमगमत्।

तदनन्तरं महासत्त्वः स नृपः प्राप्ते तु तद्दिने स्ववचनं स्मृत्वा नीलवसनं परिधाय पाणौ खड्गं गृहीत्वा प्रदोषसमये राजधानीतः परैरलक्षितः प्रस्थितः। ययौ च महारावं गम्भीरभीषणं श्मशानं यत्र भिक्षुमितस्ततो विचित्य वटस्याधः स्थितं मण्डलन्यासं कुर्वाणं वीक्ष्य तं समुपसृत्य जगाद, "भिक्षो! अयमहमागतः। किं तव समीहितं कुर्यामिति" च पप्रच्छ। नृपमागतं विलोक्य हृष्टः स भिक्षुरवोचत् "राजन्! अनुग्रहं कर्तुमिच्छसि चेदेकाकी त्वमितो दक्षिणा-

मुखं गच्छ, तत्र विदूरे शिंशपातरुमेकं द्रक्ष्यसि, तत्रास्ते कोऽप्युल्लम्बित-मृतः पुरुषस्तमत्रानीय मम सहायतां विधेहीति।"

तच्छ्रुत्वा सत्यसङ्गरः स राजा "तथेति" कृत्वा दक्षिणां दिशं ययौ, तत्र च महातमसि चिताज्वालाभिलक्षितेन पथा कथञ्चिद् गत्वा शिंशिपावृक्षं प्राप। तस्य स्कन्धे लम्बमानं भूतस्येव शवमेकमपश्यत्। वृक्षं समारुह्य स तं भूमावपातयत्। एवमकस्मात्पतितः स भृशं चक्रन्द। ततस्तरोरवतीर्णः स राजा तज्जीविताभिलाषी कृपया तस्याङ्गानि यावदस्पृशत् तावत्स शवोऽट्टहासमकरोत्। तञ्च शवं राजा वेतालाधिष्ठितं मत्वा "किमेवं हससि, एहि गच्छावः" इत्येवं यावन्निर्भयं वदति तावत्तं पुनर्वृक्षे लम्बमानमैक्षत। धीरः स भूपो भूयोऽपि भूरुहमधिरुह्य वेतालमवातारयत्। अहो! "वज्रादपि हि वीराणां चित्तरत्नमखण्डितम्।" ततः सवेतालं तं शवं स्कन्धे समारोप्य त्रिविक्रमसेनो गन्तुं प्रचक्रमे। एवं प्रयान्तं तं शवान्तःस्थो वेतालोऽब्रवीत्—

"राजन्नध्वविनोदाय कथामाख्यामि ते शृणु" इति।

(१)

मन्दारवतीकथा

अस्ति कालिन्दीकूले ब्रह्मस्थलं नाम कश्चनाग्रहारः। तत्र अग्निस्वामीति कश्चिद् वेदविद्याविशारदो विप्रः प्रतिवसति स्म। तस्य मन्दारवतीनाम्नी कन्यका समजनि यां निर्माय विरञ्चिरात्मनो दिव्याङ्गनानिर्माणकौशलमेवाजुगुप्सत। तस्यां प्राप्तयौवनायां कान्यकुब्जात् समसर्वगुणास्त्रयो विप्रकुमारास्तत्रामयुः। तेषामेकैकः स्वस्य कृते तां तत्पितरमयाचत। तस्याः पिता तु प्राणव्ययेनापि निजकन्यां अन्यस्मै दातुमनिच्छन् तन्मध्यादेकस्मै तां दातुं मतिमकरोत्। किन्तु अन्ययोरात्मघाताद् भीतः स कियन्तं कालं तां कुमारीमेवान्वमन्यत। ते त्रयोऽपि विप्रदारकास्तन्मुखेन्दुबद्धलालसाः सन्तश्चकोरव्रतमालम्ब्य तत्रैव रात्रिन्दिवं न्यवसन्।

अथाकस्मात् समुद्भूतेन ज्वरेण रुग्णा सा कुमारी मन्दारवती पञ्चत्वमगात्। ततस्तां प्रमीतां परिज्ञाय परं पीडितास्ते विप्रपुत्राः प्रसाधनं तस्या विधायान्तिमं, श्मशानञ्च नीत्वा तामग्निसादकुर्वन्। तेषामेकस्तत्रैवावासं विधाय तस्या भस्मनः शय्यां कृत्वा भिक्षयोपजीवन्नास्त। अपरस्तस्या अस्थीनि सञ्चित्य भागीरथीं ययौ, तृतीयश्च तापसो भूत्वा देशाटनार्थमगमत्। स च तापस इतस्ततः परिभ्रमन् वक्रोलकाभिधानं ग्रामं प्राप। तत्र कस्यचन विप्रस्यातिथिर्भूत्वा गृहं

प्राविशत्। सद्गृहस्थेन तेनाभिपूजितः स यावद् भोक्तुं प्रारभत तावदेकः शिशुः प्ररोदितुं प्रावर्त्तत। बहुशः सान्त्व्यमानोऽपि स यदा तूष्णीं नो बभूव तदास्य गृहिणी क्रुद्धा तं भुजाभ्यामाक्षिप्य ज्वलत्यग्नौ प्रास्यत्। क्षिप्तमात्रः श्लक्ष्णगात्रः स बालो भस्मीभूतः किल। नृशंसमिदं दृश्यं वीक्ष्यातिथिः स तापसः प्राह,

"हा धिक् कष्टं प्रविष्टोऽस्मि ब्रह्मराक्षसवेश्मनि,

तन्मूर्त्तं किल्बिषमिदं न भोक्ष्येऽन्नमिहाधुना" इति।

एवं ब्रुवाणं तं तापसं गृहपतिरब्रवीत्, "भो ब्रह्मन्! पठितसिद्धस्य मम मन्त्रस्य मृतसञ्जीवनीं शक्तिमेवक्षस्व।" एवमुक्त्वा स्वस्य मन्त्रग्रन्थमादाय ततश्च प्राणप्रदां विद्यामनुवाच्य अभिमन्त्रितां धूलिं तस्मिन् भस्मनि स प्राक्षिपत्। एवं कृते तद्रूप एव जीवन् स बालकः उदतिष्ठत् तेन च निर्वृतः सोऽतिथिः यथासुखं भुक्तवान्। गृहस्थोऽपि तं मन्त्रग्रन्थं नागदन्तेऽवस्थाप्य भुक्त्वा च रात्रौ तत्रैवातिथिना साकं शयनमभजत्।

एवं निशीथे निद्रिते तु गृहनाथे स तापसः स्वैरमुत्थाय नागदन्ताद् ग्रन्थरत्नं तदवतार्य स्वप्रियायाः पुनर्जीवने जातकुतूहलः सन् तद्गृहाद्बहिर्निर्जगाम।

ततश्चाहर्निशं व्रजन् क्रमेण तं श्मशानमाससाद यत्र तस्य प्रिया मन्दारवती दग्धाभूत्। स तत्र तस्मिन्नेव क्षणे समुपस्थितं द्वितीयं सहचरमद्राक्षीत् यः खलु गङ्गामस्थिप्रक्षेपाय गतोऽभूत्। ततः स तापसस्तमादायापरं तत्रैव निबद्धमठं भस्मशायिनं सहचरमुपेत्य प्रोवाच, "बन्धो! त्यज्यतामयन्ते मठः, एहि, अहमधुनैव कयापि मन्त्रशक्त्या भस्मतः कान्तां जीवन्तीमुत्थापयामि"—इति। एवं निर्बन्धात् तौ प्रेर्य, मठिकां च तां निर्लोठ्य स तापसः तं मन्त्रग्रन्थमुद्घाटच मन्त्रमवाचयत्।

तेन च धूलिमभिमन्त्र्य स प्रियायाः भस्मन्यवाक्षिपत्। तत्प्रभावेण च मन्दारवती जीवन्ती उदतिष्ठत्। वह्नि प्रविश्य पुनर्निष्क्रान्तं पूर्वाधिकद्युति वपुः काञ्चनेन निर्मितमिव सा कन्या बभार। तां तादृशीमभिरामां रामामवलोक्य मारेणाभिहतास्त्रयोऽपि ते सुकुमारा विप्रकुमारास्तदर्थं परस्परं कलहञ्चक्रुः। तेषामेकः मम मन्त्रमहिम्ना समुज्जीवितेयं मद्भार्या भवितुमर्हतीत्यभाणीत्। मदीयतीर्थयात्राप्रभावेण प्रादुर्भूतजीवितेयं जीवितेश्वरी ममास्तीति द्वितीयोऽब्रवीत्। तस्या भस्म रक्षित्वा मयाचरितेन तपसा पुनर्जीवनमाप्तेयं ममैव भार्येति तृतीयो जगाद।

अमुष्मिन् विवादप्रसङ्गे राजन्! त्वमेव निर्णायको मेऽभिमतोऽसि, अतः कन्यैषा कस्य पत्नी भवितुमर्हतीति निश्चयेन ब्रूहि। यदि जानन् त्वं यथार्थं न वक्ष्यसि तदा मूर्धा ते विदलिष्यतीति वेतालवचनं निशम्य स महीपतिरभ्यधात्, 'यः क्लेशं नैकविधमनुभूयापि तां मन्त्रेणाजीवयत् स तस्याः पिता किल, तेन च न पुनः पतिर्भवितुमुपपन्नः; यश्च तस्या अस्थीनि गङ्गां निनाय स तस्याः सुत एव जातः; अतः यस्तु भस्मशय्यां विरचय्य तामाश्लिष्य तपश्चरन् श्मशान एव कृतावासः सन् गाढानुरागीव व्यवहृतवान् स एव तस्याः कान्तः पतिरस्तीति मे मतिः" इति।

एवं नृपात् त्रिविक्रमसेनादाकर्ण्य निर्णयं स वेतालस्तस्य स्कन्धात्स्वपदमतर्कित एव प्रायात्।

राजाथ भिक्ष्वर्थसमुद्यतस्तं प्राप्तुं स भूयोऽपि मनो बबन्ध।
प्राणात्ययेऽपि प्रतिपन्नमर्थं तिष्ठन्त्यनिर्वाह्य न धीरसत्वाः॥

शूद्रकवीरवरकथा

ततस्त्रिविक्रमसेनो भूपतिर्भूयः श्मशाने तस्यैव शिंशिपातरोः निकटं गत्वा नरशरीरे वर्तमानं वेतालं मुक्ताट्टहासं प्राप्य तं बलेन स्कन्धमारोप्य तूष्णीमुदचलत्। चलन्तञ्च तमंसस्थो वेताल एवमवादीत्, 'राजन्! कुत्सितस्यैतस्य भिक्षोः कृते किमेवं त्वं मुधा यतसे। अस्मिन् निष्फले आयासे तव विवेको न दृश्यते। तथापि एवं कुर्वतस्ते विनोदाय कथामेकां कथयामि तां मत्तः शृणु" –

अस्ति शोभावती नाम यथार्थाभिधाना नगरी। तस्याञ्च राज्यविक्रमः शूद्रकाख्यो नृपतिरभूत्। सततं विजयिनस्तस्य जगतीपतेः प्रतापाग्निः बन्दीकृतानामरीणां ललनाभिर्धूतानां चामराणां मारुतेनानिशं प्रजज्वाल। तस्मिंश्च शासति महीं, सन्ततधर्माचरणेन स्फीता वसुन्धरा रामादीनपि क्ष्मापतीन् विसस्मार। तादृशं तं महीपालं प्रियशूरमेकदा कश्चन वीरवरो नाम द्विजः सेवार्थमुपाययौ। तस्य धर्मवती नाम भार्या, सत्त्ववरः सुतः वीरवती च कन्येति त्रयं गृहपरिच्छदो बभूव। परञ्च तस्य सेवापरिच्छदे कट्यां कृपाणी, पाणावसिः परत्र च चारुचर्माभूवन्। तावन्मात्रपरिवारो वीरवरः स स्ववृत्तये प्रतिदिनं दीनारशतपञ्चकं राजानमयाचत। आकारेणोदारपौरुषं प्रकटयन्तं तं वीक्ष्य गुणग्राही स राजा शूद्रकस्तस्मै यथेप्सितां वृत्तिं ददौ। स्तोके परिकरे सत्यपि

इयद्भिः स्वर्णरूपकैरेष किं व्यसनं पुष्णाति सद्व्ययं वा विदधातीत्यन्वेष्टुं स महीपतिः कौतुकात् तस्य पृष्ठतः प्रच्छन्नाँश्चारान् न्ययुङ्क्त। नित्यं स वीरवरः प्रातर्भूपस्य दर्शनं विधाय, मध्याह्ने च धृतायुधः सिंहद्वारे स्थित्वा निजावासं गच्छति स्म। ततश्च स्ववृत्तिलब्धानां दीनाराणां शतं भोजनार्थं स्वभार्यायाः हस्तेऽन्वहं प्रादात्। परेण च शतेन वस्त्राणि, अङ्गरागं, ताम्बूलं च क्रीणाति स्म। स्नात्वा चापरं शतं विष्णोः शिवस्य च नमस्यायै स उपायुङ्क्त। विप्रेभ्यश्च दीनेभ्यश्च स शतद्वयं दानं ददौ। एवञ्च पञ्चापि शतानि नित्यमसौ विभज्य कालमयापयत्। इत्थमग्निहोमादि नित्यं कर्म कृत्वा स पुनर्निशि करे करतलं धृत्वा सिंहद्वारेऽस्वपत्। एतादृशीं दैनन्दिनीं तस्य चर्यां दृष्ट्वा शूद्रको हृदये महान्तं सन्तोषमवाप। वीरवरं च विशेषसम्मानार्हं पुरुषातिशयं मत्वा तस्यानुमार्गगाँश्चारान् राजा निवारयामास।

एवं व्यतीते तु बहुतिथे काले घोरमेघौघे दिवानिशं वर्षत्यपि सिंहद्वारे यथापूर्वमचलो वीरवरः स्थितोऽभूत्। तं तादृशं दिवा प्रासादाग्रात् दृष्ट्वा निशि पुनस्तस्य स्थितिं जिज्ञासुः स भूयस्तदारोहत् जगाद च, "को नु सिंहद्वारे स्थितोऽत्र भोः।" तन्निशम्य "अहं स्थितोऽत्रेति" वीरवरः प्रत्युत्तरमदात्। अहो सुदृढसत्त्वोऽयं वीरवरो मे भक्तः इति सन्तुष्टो राजा, "अवश्यमयं मया महत्पदं प्रापणीयः" इति सञ्चिन्त्य प्रासादादवतीर्यान्तःपुरं प्रविश्य शयनं भेजे। परेद्युरपि पुनर्जिज्ञासू राजा तथैव प्रासादमारुह्य कः कोऽत्र भोयित्याकारयामास। "अहं स्थित" इति पुनर्वीरवरेण प्रतिशब्दितो नृपतिर्यावद्विस्मयते तावदेव विदूरे रुदतीं विषादविकलां काञ्चन स्त्रियं शुश्राव। न मे राष्ट्रे पराभूतो न वा कश्चन दरिद्रो नो वा कोऽपि

दुःखितस्तत्कथमेषा रजन्यामेकाकिनी एवं विलपन्ती श्रूयत इति जातविस्मयः शूद्रकः तं वीरवरमेवमादिदेश, "भो वीरवर! शृणु दूर एषा काऽपि स्त्री आक्रोशति, काऽसौ किञ्च रोदितीति गत्वा निरूपयेति।" एवं समादिष्टो वीरवरो निबद्धासिधेनुः प्रस्थितः। स मेघान्धकारं तञ्ज्वलद्विद्युद्विलोचनं स्थूलधाराशिलावर्षिणं रक्षोरूपं नाजीगणत्। तादृश्यां तमस्विन्यां झगिति तथा प्रस्थितं वीरवरं वीक्ष्य करुणाकौतुकाक्रान्तः स भूपतिरपि प्रासादादसिसचिव एवावतीर्य परैरलक्षितस्तमनुजगाम।

वीरवरस्तु तदाक्रन्दरवमनुसरन् नगर्या बहिरेकं सरः प्राप। तत्र च "हा शूर! हा कृपालो! त्वया शून्या कथमहं वत्स्यामीति" रुदतीं तां स्त्रियं वारिमध्यगां ददर्श। "का त्वं रोदिषि किञ्चैवमिति" भूपेनानुगम्यमानेन वीरवरेणानुयुक्ता सा स्त्री तमेवमभ्यधात्, "भो वीरवर! मामिमां महीमेवहि, यस्या ममाधुना राजा शूद्रको धार्मिकः किल पतिः। अस्माद् दिनात् तृतीयेऽहनि तस्य राज्ञो मरणं ध्रुवमिति परिज्ञाय तादृशं पतिमन्यं नैव प्राप्स्यामीति खेदादनुशोचामि"—इति।

दुःखोदन्तमिममाकर्ण्य दूनमना वीरवरोऽवादीत् "देवि! द्राग् दर्शय यदि वेत्सि कञ्चनोपायं येन जगद्रक्षामणिः स प्रभू रक्ष्येत।" तद्वचनमाकर्ण्य सा वसुन्धरा तदर्थमेकमेव साधनमस्तीति जगाद। पुनः पृष्टा च सा तादृशमद्वितीयं स्वामिभक्तं तं शर्मोपायमेवमाह "येषा राजकुलान्तिके राज्ञा कृतप्रतिष्ठा चण्डिका देवी विद्यते तस्यै चेदद्यैव सत्त्ववरं निजं तनयमुपहारीकरोषि तन्नैष राजा म्रियते चान्यत् शतं समा जीवति।" एवं विज्ञापिते "यामि, देवि! करोम्येतदधुनैव" इत्याभाषमाणो वीरवरः "भद्रं तव" इत्यभिदधानायाः वसुधायाः आशिषं

गृहीत्वा प्रतस्थे। अत्रान्तर एव वसुधा सा तिरोदधे। सर्वममुं सम्वादं रहसि निलीनो नृपः शुश्राव। ततः किङ्करिष्यतीति गूढं जिज्ञासौ राज्ञि तमनुगच्छत्येव वीरवरस्त्वरितं स्वगेहं प्रविश्य निश्येव सकलां कथामात्मनः पत्नीं विबोध्य कथयामास। सद्गृहिणी च सा प्रभोः शिवं द्रुतमेव विधेयमिति अनुमन्वाना सुतञ्च प्रबोध्य समस्तं वृत्तान्तमुदगिरत्, प्राह च तं "चण्डिकायायुपहारीकृते त्वयि राजा जीवत्यसौ नो चेत्तृतीयेऽह्नि विपद्यते" इति। बालोऽपि प्रौढमतिः स धीरया धिषणया पितरमब्रवीत्—

"कृतार्थोऽहं मम प्राणै राजा चेत्तात जीवति।
भुक्तस्य हि तदन्नस्य दत्ता स्यान्निष्कृतिर्मया॥"

इति सुतेन सहर्षं स्वीकृते तूपहारप्रस्तावे "साधु, सत्यं प्रसूतोऽसि मत्तः पुत्र!" इति प्रशंसँस्तं, राज्ञा सविस्मयं विलोक्यमानो वीरवरः सुतं स्कन्धे समारोप्य, सकन्यया भार्यया प्रच्छन्नेन च पृथ्वीभुजाऽनुगम्यमानश्चण्डिकामन्दिरमुपाययौ। तत्र च देव्याः पुरस्तात् तातेन स्कन्धादवतारितः सुतो "मम मूर्धोपहारेण राजा जीवतु शूद्रकः अन्यच्च वत्सरशतं प्राज्यमिदं राज्यं कुर्यादिति" देवीमुपश्लोकयामास। साधु, साध्वित्युदीरयन् पिता सूनोश्शिरश्छित्त्वा देव्यै तदर्पयाञ्चकार।

तस्मिन्नेव क्षणेऽन्तरिक्षादशरीरिणी वागुदगात् "साधु, कः स्यात्त्वदन्यः स्वामिभक्तो वीरवरो भुवीति"। हतं भ्रातरं वीक्ष्य स्नेहेन तद्दुःखं सोढुमशक्नुवाना कन्या वीरवत्यप्यात्मानं व्यापादयामास। अपत्यशोकाद्विलपन्तीं, प्रविशाम्यनलं तावदित्याग्रहाद् वदन्तीं दयितां तस्या दारुणं च दुःखं दृष्ट्वा, वीरवरः स्वयं दारुभिर्दीप्तां चितां तत्कृते तत्राकरोत्। पत्युः पादयोः पतित्वा, प्रणम्य च देवीं, "जन्मान्तरेऽपि अयं भूयादार्यपुत्रः पतिर्ममेति" ब्रुवाणा अपांसुला सा ज्वालामालाकुले

तस्मिश्चितानले निपपात। ततो निष्पन्नं मे राजकार्यं, भुक्तस्यान्नपिण्डस्याहमनृणो जातः इत्यात्मनः कृतकृत्यतां मन्वानो वीरवरः एकाकिनः स्वस्य जीविताभिलाषं साम्प्रतमसाम्प्रतममन्यत। किमर्थमहमधुनात्मोपहारेणाम्बिकां न प्रीणयेयमित्यालोच्य स देवीं तां स्तुत्या प्रागुपस्थितवान्।

"जय जगदर्चितचरणे, शरणे निःश्रेयसस्य भक्तानाम्
जय धृतभास्करकिरणे, तरणे दुरितान्धकारवृन्दानाम्।
जय कालि! कपालिनि जय! जय कङ्कालिनि! भवानि! नमोऽस्तु ते
शूद्रकनृपतेरधुना प्रसीद मन्मस्तकोपहारेण।"

एवं संस्तुत्य तां देवीं स वीरवरः करतलाघातेन सद्यः स्वमुत्तमाङ्गमच्छिनत्।

तत्सर्वं विलोक्य तत्र च्छन्नः शूद्रको विस्मयेन व्याकुलो व्यचिन्तयत् "अहो! किमनेन साधुवृत्तिना मत्कृते दुष्करं कर्म कृतम्। असारेऽप्यस्मिन् संसारे विचित्रमिदं यदेतादृशो धीरो भवेद्यः प्रभोरर्थे परोक्षमसूनपि दद्यात्। यद्यहमस्योपकारस्य न प्रतिकुर्यान्तदा का नाम मे प्रभुता, किञ्च मया पशोरिव जीवितव्यं किलेति" सञ्चिन्त्य भूपालेन कोषतः खड्गं समाकृष्य सा देवी न्यवेदि, "भगवति! सततमनुप्रपन्नस्य मम शीर्षोपहारेण सुप्रीता त्वं भव, मयि चानुग्रहङ्कुरु यतो यथार्थाभिधानो मदर्थं त्यक्तजीवितोऽयं विप्रो वीरवरः सकुटुम्बोऽपि जीवतु।"

एवमुदीर्य यावदसिना शिरश्छेत्तुं राजा प्रवर्त्तते तावदेव दिवो भव्या भारती समुदभूत् "राजन्! त्वं मुधा साहसं मा कृथाः अनेन ते सत्त्वेनाहं प्रीणिताऽस्मि। अयं भूसुरो वीरवरः सापत्यदारः प्रत्युज्जीवतु नाम।" इत्युक्त्वा सा वाग् व्यरमत्। पुत्रेण, दुहित्रा,

कलत्रेण च साकं जीवन्नक्षतो वीरवरस्तस्मिन्नेव क्षणे समुत्तस्थौ। सुप्तोत्थित इवाशु तमात्मनः परिजनं प्रेक्ष्य विभ्रान्तो वीरवरो दारसुतान् पृथगाकार्य पृष्टवान् "यूयं भस्मीभूताः कथं पुनरुत्थिता" इति। स्वहस्तेनैव च्छिन्नमस्तमप्यात्मानं जीवन्तमनुपश्यता चकितेन वीरवरेण सार्धं दारसुतास्ते देव्यनुग्रह एवायमिति निश्चयमकार्षुः। ततोऽम्बिकां वीरवरो नत्वा पुत्रदारानादाय स्वालयं ययौ।

ततः समुपागते प्रदोषसमये वीरवरः पूर्ववत् राज्ञः सिंहद्वारमगात्। राजाऽपि तत्सर्वं समीक्ष्य क्षपायां प्रासादमारुह्य व्याहरत् "कः कोऽत्र तिष्ठतीति।" निशम्य च प्रभोर्वचः "सोऽहमस्मीति" वीरवरोऽवादीत्। प्राह च "देवादेशादहन्तामाक्रन्दमानां स्त्रियमन्वेष्टुमगाम्, सा च राक्षसीव दृष्टनष्टैवाभूत्।"

एतादृशं निरभिमानं निशम्य तस्य वचः, प्रत्यक्षदृष्टोदन्तः स भूपः विस्मितोऽपि सस्मितं व्यचिन्तयत्।

"अहो समुद्रगम्भीर–धीरचित्ता मनस्विनः।
कृत्वाप्यनन्यसामान्यमुल्लेखं नोद्गिरन्ति ये।"

एवमाकलयँस्तूष्णीमेव प्रासादादवरुह्यान्तःपुरं प्रविश्य रात्रिशेषं निनाय। ततः प्रगे दर्शनायोपगते तस्मिन् वीरवरे भृशं प्रीतः स महाराजः कृत्स्नं रात्रिवृत्तान्तं मन्त्रिभ्यस्तमवर्णयत्। सर्वे च ते आश्चर्यमोहिताः समभूवन्। सुप्रसन्नः पृथ्वीपतिः सपुत्राय वीरवराय लाटदेशे कर्णाटयुते राज्यं ददौ। ततः प्रभृति तुल्यविभवौ तावन्योन्यमुपकुर्वन्तौ वीरवरशूद्रकौ भूपौ सुखमासाताम्।

इत्याख्याय कथां वेतालस्त्रिविक्रमसेनं नृपमवोचत्, "राजन्! एतेषु को नाम सर्वेष्वधिको वीर" इति मामाचक्ष्व। यदि जानन्नपि त्वं न वक्ष्यसि तदा पूर्वाभिहित एव ते शापोऽस्ति। वेतालस्य प्रश्न-

ममुं निशम्य राजा प्रत्यवादीद्यदेतेषु शूद्रक एव प्रकृष्टो वीरः। निर्णयममुं श्रुत्वा वेतालः प्रत्याक्षिपत्,—"कथं वीरवरो न वीर्यवत्तरः, तत्पत्नी वा किमर्थं नाभ्यधिका यया निजस्यात्मजस्योपहारपशुतापि प्रत्यक्षमेव दृष्टा, कथं वा बालोऽपि प्रौढसत्त्वः सत्त्ववरो वरीयान् वीरो न गण्यते ?" एवं ब्रुवन्तं वेतालं नृपतिर्जगाद "मा, मैवम्। कुलीनो हि वीरवरस्तस्य कृतेऽसुभिः सुतैर्दारैरपि स्वामिसंरक्षणं व्रतमेव। तत्पत्नी साध्वी कुलजा पत्येकदेवता भर्तृवर्त्मानुसारिण्येव भवितुमर्हति, तत्र किमाश्चर्यम्। तयोः सुतः सत्त्ववरः सत्त्वे सदृश एव भवति, यदुक्तं हि—'यादृशास्तन्तवः कामं तादृशो जायते पटः'। अतो येषां प्राणैः नृपैरात्मा सततमभिरक्ष्यते तेषां भृत्यानामर्थे कलेवरं त्यजन् शूद्रक एवात्र विशिष्यते।"

एतादृशं नृपतिना सयुक्तिकं प्रयुक्तं वचः समाकर्ण्य वेतालः सहसैव निजमायया स्वपदमगात्। सत्यसङ्गरश्च राजा पुनरपि तमानेतुमुदचलत्।

(३)

हरिस्वामिकथा

अथ च पुनरपि स महीमहेन्द्रः शिंशपाशाखिनोऽन्तिकं गत्वा नरशरीरगतं वेतालं स्कन्धे निधाय गन्तुं प्रववृते। तूष्णीमेव व्रजतस्तस्य मनोविनोदायांसस्थः कथामिमां वेतालो व्याजहार।

अवन्तिकायां पुण्यसेनाभिधस्य नरपतेरनुजीवी हरिस्वामी प्रियोऽमात्योऽभवत्। गृहमेधिनस्तस्यात्मनोऽनुरूपायां प्रियायामभिरूपो देवस्वामी'ति पुत्रस्तथैवासामान्यै रूपगुणैर्विश्रुता सोमप्रभेति चान्वर्थाभिधेया तनया समुदपद्यत। आत्मनो लावण्योत्कर्षस्याभिमानिनी सा प्रदानोपयुक्तवयोगता मातुर्मुखेन जनकं भ्रातरञ्चागादीत् मज्जीवितेन कार्यञ्चेदहं शूराय ज्ञानिने विज्ञानिने वा प्रदेयेति।

तदाकर्ण्य तत्पिता तादृग्वरं चिन्वन् यावच्चिन्तयति तावदेव राज्ञा स संग्रामसमुत्सुकस्य दाक्षिणात्यनरेन्द्रस्यान्तिकं सन्धिसम्पादनाय व्यसर्जि। कृतकार्यो हरिस्वामी तत्रैव केनचिद्द्विजाग्र्येण श्रुततद्रूपसम्पदा स्वसुतां याचितः प्रावोचत् नूनं सा शूराज् ज्ञानिनो विज्ञानिनो वापरं पतिं नेच्छति मदीया कन्या। सोऽवदज्जानाम्यहं विज्ञानम्। तत् प्रदर्शयेति पुनरर्थितो विज्ञानी द्युचरं रथं स्वशक्त्या निर्माय तत्र हरिस्वामिनमारोप्य स्वर्गादींल्लोकान्दर्शयित्वा पुनः कटकमानयत्। तेन तुष्टः स हरिस्वामी तस्मै स्वां सुतां प्रत्यशृणोत् सप्तमेऽहनि च विवाहं निश्चिकाय।

तस्मिन्नेव कालेऽवन्तिकायामपरेण विप्रवरेण्येन तत्सुतो देवस्वामी स्वसारं याचितः। ज्ञानिविज्ञानिशूरेभ्योऽन्यन्नेच्छति सा पतिमित्युक्तः स दर्शितशस्त्रास्त्रकौशलः आत्मानं 'शूरं' सत्यापयामास। देवस्वाम्यपि तस्मै प्रतिश्रुत्य निजां भगिनीं, सप्तमे दिवसे विवाहविधिं निर्वर्त्तयितु-मभ्यधाज्जनन्याः परोक्षमेव।

तदैव च तज्जननी तृतीयेनैकेन सुतां याचिता तामेव प्रसिद्धां तत्-प्रतिज्ञामाश्राव्य, प्रतिज्ञोद्दिष्टेष्वहमस्मि ज्ञानीति तेनोक्ता तदीयमती-तानामनागतानां वस्तूनां विवेचकं ज्ञानं विलोक्य, तस्मै स्वसुतां दातुं प्रतिज्ञामकरोत्, सप्तमेऽह्न्येव च विवाहं प्रतिजज्ञे।

परेद्युः प्रतिनिवृत्तो हरिस्वामी आत्मनः कन्यादाननिश्चयं भार्यायै पुत्राय चाकथयत्। तावपि स्वकृतं तस्मै पृथक् पृथगब्रूताम्। वर-त्रयनिमन्त्रणादाकुलः संवृत्तः स गृहपतिः।

अथोद्वाहदिवसे हरिस्वामिगृहं ज्ञानिविज्ञानिशूरास्त्रयोऽपि वराः समागमन्। चित्रमेतत्तत्कालमेव सा 'सोमप्रभा' क्वाऽप्यतर्कितङ्गता विचित्यापि नालभ्यत।

हरिस्वामी ससम्भ्रमं ज्ञानिनमब्रवीदिदानीं ब्रूहि क्वास्ते सा मद्-दुहिता। तदाकर्ण्यऽवादीज्ज्ञानी धूमशिखो नाम राक्षसस्तां हृत्वा विन्ध्याटवीं नयति स्म। ज्ञानिनैवमुक्ते भीतो हरिस्वामी समवदत् "हा धिक्। कथं सा प्राप्येत, कथञ्च तस्या विवाहः?"

श्रुत्वैतद्विज्ञानी तं समाश्वास्य, रथं सर्वोपकरणयुतन्निर्माय, तत्र हरिस्वामिनं तौ शूरज्ञानिनौ चारोप्य, ज्ञानिना समाख्यातां तद्राक्षस-वसतिं विन्ध्याटवीमनयत्। तत्र च हरिस्वामिना पुरस्कृतः शूरस्तेन ज्ञातवृत्तान्तनिर्गतेन रक्षसा युद्धमकरोत्। चित्रास्त्रयोधिनोस्तयोर्नर-रक्षसो रामरावणयोरिवाश्चर्यकरः सङ्गरः समजनि। सङ्ग्रामदुर्मदस्यापि

तद्रक्षसोऽर्धचन्द्रेण बाणेन स शरः क्षणेन शिरोऽच्छिदत्। हते रक्षसि, तन्निवासात् सोमप्रभामादाय ते सर्वे विज्ञानिरथेन परावृत्ताः।

अथोपस्थितायां लग्नवेलायां ज्ञानिविज्ञानिशूराणां समुदभूद्विवादः। ज्ञानी जगाद, "यदि ज्ञानबलेन नाहं जानीयाङ्कथं गूढस्थेयं कन्या लभ्येत?" विज्ञानी त्ववदत्, "नाहञ्चेदाकाशगामिनं रथं कुर्याङ्कथं देवानामिव वो गमागमौ स्याताम्? कथञ्चारथं युद्धं रथिना रक्षसा भवेदतो मदुपायार्जितेयं मह्यमेव देया।" शूरोऽप्युवाच, "रणस्थले यदि नाहं हन्यां रक्षस्तदा कृतेऽपि युवाभ्यां यत्ने क आनयेत्कन्याम्? तेन हि कन्येयं मदुपभोग्यैवेति मह्यमेव प्रदेया। हरिस्वामी तु समाकर्ण्यैत-दुद्भ्रान्तमानसो जोषमस्थात्।

राजन्! त्वमेवेदानीं वद, तेषु कस्मै देया स कन्या? यदि नो वक्ष्यसि शीर्षं ते स्फुटिष्यतीत्याकर्ण्य वेतालवाक्यं, विहाय मौनं नरेन्द्र-स्त्रिविक्रमसेनोऽवादीत्, "शूरायैव सा कन्या प्रदेया, तेन हि प्राण-पणोद्यमात् सा भुजबलेनार्जिता। ज्ञानिविज्ञानिनौ तु धात्रा तत्कर्मकरौ निर्मितौ, यथा हि गणकतक्षाणौ परोपकरणीभूताविति"।

मनुजेन्द्रस्य समुचितमुत्तरं समाकर्ण्य स वेतालस्तत्स्कन्धाग्रात्पूर्ववदेव निजपदं प्रपेदे। राजाप्यनुद्विग्नः पुनरपि तदानयनाय प्रास्थात्। यतः

"उत्साहैकधने हि वीरहृदये नाप्नोति खेदोऽन्तरम्।"

(४)

सत्त्वशीलकथा

पुनश्चाथ स महीपतिस्त्रिविक्रमसेनस्तस्माच्छिंशपापादपाद् गृहीत्वा तमेव प्रकृतं वेतालं, प्रचलन् पथि प्रोक्तस्तेन। राजन्! प्रशस्यप्रयत्नोऽसि तव श्रमापनोदनार्थमाख्यामि कथामपरान्तां कर्णे कुरुष्व।

पूर्वाम्बुधेस्तटे 'ताम्रलिप्ती'ति प्रसिद्धा पूरस्ति। तस्यां चण्डसेनाभिधो धराधिपोऽभूत् यः खलु पराङ्मुखः पराङ्गनासु न तु सङ्गराङ्गणेषु, आहर्ता वैरिसम्पदाञ्च च परकीयसम्पदाम्।

तस्य भूपतेः सिंहद्वारे कदाचिज्जनप्रियः कश्चन राजपुत्रो दक्षिणाशातः समागतः सत्त्वशीलाख्यः। स च तत्र नृपं प्रत्यात्मानन्निवेद्य, नैर्धन्यादपरैः राजकुमारैः सह कार्पटिको भूत्वा, बहून्यब्दानि नृपं परिचरन्नलब्धफल एवातिष्ठत्। सर्वदा चाकरोच्चेतसि, "यदि राजकुले जन्म, किमीदृशन्निर्धनत्वम्? निर्धनत्वञ्चेत्कथम्महापदाभिलाषुकत्वम्? अयमपि नृपः क्षुधावसीदन्तमपि सेवमानम्मान्नावलोकयति; किमेतदिति?"

एकदा स नरेन्द्रस्तस्मिँल्लगुडकरेऽग्रेसरे कार्पटिके धावति ससैनिको मृगाटवीमविशत्। कृताखेटेन तेन महान्तं मत्तसूकरं विलोक्य तमनुधावता वनान्तरमतिदूरे वर्त्तमानं प्रापि। तस्मिन् महावने हारितसूकरः स नृपवरो दिङ्मोहमगच्छत्। परिभ्रष्टसैनिकः स खल्वेका-

2

किना तेन पदातिना क्षुत्तृर्डदितेन कार्पटिकेन तत्प्राणरिरक्षुणा वाताश्वपृष्ठगोऽपि समनुसृतः।

तथाविधमन्वायान्तन्तमवलोक्य सस्नेहमवादीत् स भूपतिः—"वेत्सि कच्चिद्यथागतम्मार्गम् ?" तदाकर्ण्य बद्धाञ्जलिना तेनावादि—"स्वामिन् वेद्मि सम्यक्, क्षणं विश्राम्यतु प्रभुस्तावदत्र, ललाटन्तपस्तपति भगवान् सप्तसप्तिः।" श्रुत्वैतत्सोपरोधमभाषत राजप्रवरः "एवञ्चेत्तर्हि क्वापि पानीयं प्रेक्ष्यताम्भवता।"

एवमुक्तः स परिसरवर्तिनमुत्तुङ्गन्तरुवरमारुह्य नातिदूरे प्रवहन्तीमुदधिप्रियामवालोकयत्। अथावरुह्य, ततो नरपतिन्तत्र नीत्वा, तद्वाहं विपर्याणीकृत्य, कृतविवर्तनञ्च तन्दत्ताम्बुशष्पकवलं विगतश्रमं व्यधात्। कृताह्निकाय च राज्ञे वसनप्रान्तादुन्मुच्य हृद्यान्यामलकानि प्रक्षाल्यार्पयत्। कुत एतानीति जिज्ञासुञ्जगतीपतिञ्जानुस्थितस्सामलकाञ्जलिः स व्यजिज्ञपत् "एतद्वृत्तिरहमतिवाहितवत्सरदशको मुनिव्रतश्चराम्याराधयन् देवमिति।" तच्छ्रुत्वा ह्रीतः स नरपतिः सत्यं त्वं सत्त्वशीलः किमुच्यतेऽधिकमिति तं प्रशस्यावोचत्—

"धिङ् नृपान् क्लिष्टमक्लिष्टं ये भृत्येषु न जानते।
धिक् च तं परिवारं यो, न ज्ञापयति ताँस्तथा॥"

इत्युक्त्वा कार्पटिकहस्तादामलकद्वयं तदनुबन्धविशेषेणागृह्णात्। भुक्त्वा, जलन्निपीय, क्षणं विश्रम्य, तेन सज्जीकृतं वाहञ्चारुह्य, जग्धामलकसम्पीतजलेन तेनानुयातः, अलमभ्यर्थितेनापि हयस्य पश्चाद्भागमनारूढेन तेनैव दर्शितमार्गः पथि मिलितात्मसैनिकः स्वपुरीं प्राप्तवान्। तत्र च तद्भक्तिं प्रख्याप्य, तं वसुभिरापूर्याप्यात्मानन्नानृणममन्यत। सोऽपि सत्त्वशीलस्त्यक्तकार्पटिकाचारः कृतार्थश्चण्डसिंहस्य भूपतेः पार्श्वेऽतिष्ठत्।

अथैकदा स सिंहलपतेः सुतामात्मार्थं याचितुं राज्ञा सिंहलद्वीपं प्रेषितोऽभवत्। तत्राब्धिवर्त्मना गमिष्यन्नर्चिताभीष्टदैवतो राजादिष्टै-र्द्विजवरैः साकं प्रवहणमारुरोह। मध्यभागावधि तस्मिन् प्रवहणेऽशङ्कितं प्राप्ते सुवर्णनिर्मितश्चलद्विचित्रवैजयन्तीविराजितोऽभ्रंलिहाग्रो महाध्वजो जनितविस्मयः पारावारात् समुदभूत्। तत्कालमेवाकालजलदावली च वर्षितुमारेभे। तैरतिवर्षैराधोरणैरिव बलादाकृष्यमाणः स प्रवहण-द्विपः समासक्तो ध्वजस्तम्भे। सोऽपि ध्वजस्तम्भः सार्धं प्रवहणेन वीचिविप्लुते वार्निधौ निमज्जितुं प्रावर्तत। तद्गतास्ते द्विजा भया-कुलाः प्राणपरीप्सवश्चण्डसिंहं स्वभूपतिमुद्दिश्याब्रह्मण्यमुदघोषयन्।

तदाकर्ण्यासहिष्णुः सत्त्वशीलः कृपाणपाणिर्बद्धपरिकरोऽनुध्वजमात्मा-नमक्षिपन्निरपेक्षमेव महोदधौ। भग्ने च तस्मिंस्तद्वहनं वातोर्मिचपेटि-काभिरभज्यत, तत्स्थाश्च यादोमुखेषु प्रापतन्।

स हि सत्त्वशीलो ध्वजमनुसरन्निदानीं दिव्यं पुरमपश्यन्न तु वारि-धिम्। तत्र च रम्यरत्नरचितसोपानवापिकोद्यानशोभिनि मणिस्तम्भ-भास्वरे हेममन्दिरे मेरुप्रोन्नतं उच्छ्रितचित्रध्वजं कात्यायनीगृहन्नयन-विषयमकरोत्। ताम्भगवतीं प्रणम्य, स्तोत्रैः संस्तुत्य, गन्धपुष्पैरभ्यर्च्य किमेतदिन्द्रजालमित्याश्चर्यात्तदग्रतः समुपाविशत्।

तावदेव देव्यग्रगतप्रभामण्डलान्तरात् सहसा दिव्यकन्यैकोद्घाट्य कवाटकन्निरगात्। सेन्दीवराक्षी वदनेन विधुं विडम्बयन्ती, स्मितेन सुमनांसि परिहसन्ती, स्वाङ्गमार्दवेन मृणालसूत्रमपि न्यग्भावयन्ती, रामासहस्रपरिवृता देवीगर्भगृहमविशत्, तथैव सत्त्वशीलहृदयमपि।

अथ समयेन समाप्तसपर्या देवीगृहान्निर्गत्य तत्रैव प्रभामण्डले प्रवि-शन्तीन्तां विलोक्य सोऽपि तत्र पुनः प्रविश्यापरमेव पुरवरमवलोकया-मास। तत्र च मणिपर्यङ्कनिषण्णान्तामुपेत्य पार्श्वे उपाविशद्दिङ्मूढ

इव। सा हि तथाविधमनवस्थितधीविभवन्तमवलोक्य चेटीनाम्मुखेषु दृशं निधाय सङ्केतेन करणीयं समादिशत्। इङ्गितज्ञास्तास्तमवादिषुः, "अतिथिस्त्वमिहास्माकमतोऽस्मत्स्वामिनीकृतमातिथ्यं भजस्व। उत्तिष्ठ, स्नाहि, ततश्च भुङ्क्ष्वेति।" तच्छ्रुत्वा सोऽप्याशान्वितः कथञ्चिदुत्थाय ताभिः प्रदर्शितायामुद्यानवापिकायां निमग्नस्तत्क्षणादेव ताम्रलिप्त्यामुदतिष्ठच्चण्डसिंहनृपोद्यानवापीमध्यात्।

अकस्मादेव तत्रात्मानमुपलभ्याचिन्तयद् "अहो! किमेतत्? क्व तदुद्यानम्? क्व च तद्दिव्यं पुरम्? क्व च सुधासारसमं तस्या दर्शनम्, क्व चानुपदमेव तद्विश्लेषमहाविषम्? स्वप्नोऽपि नायम्, विनिद्रो हि मेऽनुभवः। ध्रुवमेव ताभिर्दिव्यकन्यकाभिर्मूढोऽस्म्यहं वञ्चितः।" एवं ध्यायन्नुन्मत्त इव तदुद्याने परिबभ्राम।

तदवस्थन्तमवलोक्योद्यानपालाश्चण्डसिंहमहीभृतं व्यजिज्ञपन्। तदाकर्ण्योद्भ्रान्तः स नरपतिः स्वयमेत्य तादृशन्तमवालोकयत्। सान्त्वयित्वा चापृच्छत्, "सखे! किमेतत्? क्व प्रस्थितः? क्व च त्वं प्राप्तः?" सोऽपि सत्त्वशीलो नृपतये सर्वं स्ववृत्तान्तमवर्णयत्। भूपतिस्तदाकर्ण्य मनस्यचिन्तयत् —

'हन्त वीरोऽपि मत्पुण्यैः कामेनैष विडम्बितः।
आनृण्यं गन्तुमेतस्य लब्धो ह्यवसरो मया॥'

इति विचार्य स महीपतिः समवदत्—"एवं चेत्तर्हि मुञ्च शुचन्त्वदभीप्सितसिद्धावहमस्मि शक्त" इत्याश्वास्य स्नानादिना तमुपाचारयत्।

अथापरेद्युर्मन्त्रिषु निजराज्यभरं विन्यस्य तेन समं प्रवहणारूढस्तद्दर्शितपथोऽम्बुधिमध्यं प्राप्य प्राग्वदेवोत्थितं महाध्वजं विलोक्य तेन सत्त्वशीलेन स नृपतिरभिहितः "नरेन्द्र! सोऽयं दिव्यप्रभावो ध्वजः समुत्थितः, मयि मग्ने देवेनापि मामनुसरताऽत्र मङ्क्तव्यम्।" राजापि तथैव

तत्रात्मानं निक्षिप्यान्तर्मग्नस्तद्दिव्यं पुरं प्राप। साश्चर्यो भूपतिस्तत्पुरस्थां देवीं प्रणम्य ससत्त्वशीलस्तामुपास्त। तावदेव सखीजनसङ्गता सा रूपिणीव प्रभा दिव्यकन्या ततः प्रभामण्डलकान्निर्गता। 'इयं सा सुमुखी' इति तेनोक्ते 'अस्यामस्य परिष्वङ्गो युक्त' इति नृपोऽपि स्वीचकार। सापि तं राजानं शुभशारीरलक्षणं वीक्ष्य पुरुषातिशयं मत्वा पूजायायम्बिकाधाम प्राविशत्। नृपोऽपि सत्त्वशीलमादायोद्यानमगात्।

अथ चासुरकन्यका सम्पाद्य सपर्याविधिं, सत्पतिप्राप्तिं याचित्वा, देव्या गर्भगृहान्निर्गत्य, सखीमात्मनो रहस्यधारिणीमवादीत् "सखि! योऽसौ पुरुषविशेषो मया व्यलोकि, गवेष्यतां क्वास्ते सः"। एवं तयोक्ते तदीया सखी विचित्योद्यानवर्तिने तस्मायातिथ्यग्रहणाय प्रह्वा सती स्वस्वामिनीनिदेशं न्यवेदयत्। तदाकर्ण्य स वीरनृपतिः सहेलन्तदग्रहणेच्छुस्तान्न्यषेधत्। तद्वदेव च सख्या श्राविता सा दैत्यकन्यका तमुदारतमं मत्वा, मनुजदुर्लभेऽप्यातिथ्ये निःस्पृहात्मनस्तस्य धैर्यपाशेन समाकृष्यमाणेव, तत्कालावधि पत्यर्थं विहितस्य देवीवरिवस्याविधेः परिपाकसमर्पितं पितरमेव तं मत्वा स्वयमेवोद्यानमगच्छत्। शकुनिकलरवैरालपन्तमिव, वातोद्वेल्लितलताभुजैरालिङ्गन्तमिव, तरुपतितकुसुमकुलैः समभ्यर्चन्तमिव तमाक्रीड़मुपगम्य सप्रश्रयमातिथ्यग्रहणाय नृपमभ्यार्थयत्। तत्प्रार्थितोऽवनिपतिरभ्यवदत्—"सुन्दरि! अनेन मत्सुहृदा वर्णितां ध्वजपथप्राप्यां परमाद्भुतकेतनां भगवतीं कात्यायनीं द्रष्टुमिहागतोऽहमस्मि। सा हि मया साक्षात्कृता, तथैवातर्कितोपगता त्वमपि। कान्यात्रातिथ्यार्थिता ममेति।"

एवमुक्ता सा कन्यकाब्रवीत्—"तर्हि द्वितीयं मे त्रिजगदद्भुतं पुरं वीक्षितुं कृपां विधेहि।" तदाकर्ण्य विहसता नरपतिनाभाणि, "तन्माहात्म्येन समं तस्याः स्नानवापिकायाश्चमत्कृतिरपि मयैतन्मुखादाकर्णिता।"

ततो हि सा मर्मण्युपहतेवावादीत्–देव ! मैवमादिश, नाहं विडम्बनशीला, का वा पूज्ये विडम्बना ? अहं हि त्वदुत्कर्षमाहात्म्येन किङ्करीकृतास्मि, तेन हि मेऽभ्यर्थनाभङ्गं मा कुरुष्व।

एतच्छ्रुत्वा तथेत्युदत्त्वा सत्त्वशीलसखः स महीवल्लभस्तया सह प्रभामण्डलोपान्तं गत्वापावृतकपाटन्तदन्तःस्थमपरं पुरं प्रविश्य, महार्हे रत्नासने समुपवेशितो यथोचितमर्घ्यादिपूजानन्तरं तया सादरमवादि।

अहमस्मि कालनेमेर्महासुरेन्द्रस्य कन्या। पिता हि मे समरे चक्रायुधेन हरिणा स्वः प्रापितः। एतच्च पुरद्वयं मे पैतृकं विश्वकर्मकृतन्नात्र जरामृत्यू बाधेते। इदानीञ्च त्वस्मे पिता अहञ्च सपुरा सविभवा त्वदाज्ञावशवर्तिनीति।

एवमर्पितसर्वस्वान्तामवनिजानिरवोचत्, "यद्येवन्तर्हि मया त्वमस्मै गुणिने वीराय सुहृदे बान्धवाय च सत्त्वशीलाय दत्तासि।" मूर्तेनेव देवीप्रसादेन नृपेणैवमादिष्टा सा गुणवती विनम्रा तामाज्ञामग्रहीच्छिरसा।

ततश्च कृतार्थङ्कृततत्पाणिग्रहं समुपलब्धासुरपुरैश्वर्यं सत्त्वशीलं स मेदिनीपतिरभाणीत्–सखे ! भुक्तयोरामलकयोरेकस्मया ते संशोधितन्द्वितीयतश्चासंशुद्धादिदानीमपि नानृणोऽस्मीति। प्रणमन्तं तमेवमुक्त्वा स दैत्यकन्यामगदत्–पुत्रि ! मार्गो म इदानीं प्रदर्श्यतां येन निजनगरीं प्राप्नुयाम्। एवंवादिनम्महीवल्लभं साऽसुरेन्द्रतनयाऽपराजितन्नाम खड्गं जरामृत्युहरञ्चैकमनुपमं फलं दत्वा व्यसर्जयत्। नरेन्द्रोऽपि तद्वस्तुद्वयं गृहीत्वा तया प्रदर्शितायान्तस्यामेव वाप्यां मग्नः स्वोद्यानवापिकात उन्मग्नः क्रमेण संसिद्धसर्वकामोऽभवत्। सत्त्वशीलश्च दैत्येन्द्रपुरस्य राज्यमशात्।

तद्ब्रूहि नरेन्द्र ! द्वयोरनयोः सत्त्वशीलचण्डसेनयोः कतरः सत्त्वाधिक इति वेतालप्रश्नमाकर्ण्य तच्छापभीतस्त्रिविक्रमसेनस्तमभाषत–

"वेतालवरेण्य ! उभयोरेतयोरधिकसत्त्वो मे सत्त्वशील एव मतः, यः खलु प्रागविदिततत्त्वार्थोऽपि निरास्थोऽम्बुधौ पतितः। राजा तु विदितरहस्यः पश्चादेवाविशज्जलनिधिम्। यच्चासुरेन्द्रसुतान्नाकामयत सः, तत्तु सत्त्वशीलार्थसम्पादकात्मवचनभङ्गभियैवेति।"

एवं प्रदत्तसमुचितोत्तरस्य नरपतेः स्कन्धप्रदेशादन्तर्हितः स वेतालः प्राग्वदेव निजपदञ्जगाम। नरपालोऽपि तथैवानुद्विग्नस्तमानेतुञ्जवादन्वगमत्। यतश्चोक्तम्—

"प्रारब्धे ह्यसमाप्ते कार्ये, शिथिलीभवन्ति किं सुधियः।"

(५)

धर्मध्वजकथा

ततस्त्रिविक्रमसेनो नृपः शिंशपातरुं प्राप्य तं वेतालं पुनः स्कन्धेनादाय प्रतस्थे। प्रयान्तञ्च तं क्षितिपतिमंसस्थितो वेतालोऽब्रवीत्-हे राजन्! तव मनोविनोदाय विचित्रामेकां वार्त्तां वर्णयामि तां शृणु।

आसीत् पूर्वमुज्जयिन्यां धर्मध्वजो नाम नृपः। तस्य इन्दुलेखा-तारावलीमृगाङ्कवतीतिनामधेयाः निःसामान्यगुणगणान्विताः तिस्रो राजपुत्र्योऽतिवल्लभा भार्या अभवन्। एताभिस्तिसृभी राज्ञीभिः सह विहरन् स राजा जिताशेषरिपुस् तत्र सुखमासाञ्चक्रे। एकदा वसन्तसमयोत्सवे प्राप्ते ताभिः प्रियाभिः सहितः स क्रीडितुमुद्यानं ययौ। मधुना सज्जिताः कन्दर्पस्य चापयष्टीरिवालिमालामौर्वीकाः पुष्पानता लता विलोकयन्, तद्द्रुमाग्रस्थितकोकिलोदीरितां गिरञ्च शृण्वन्, वासवोपमः स पृथिवीपतिरन्तःपुरैः साकं मनोजजीवितस्यापि जीवितानि प्रियापीतावशेषाणि मधूनि पिबन् रेमे। तत्रेन्दुलेखायाः कर्णाग्रादुत्सङ्गे कमलमेकं पपात। तेन सहसा वक्षसि क्षतेऽभिघातजे जातेऽभिजाता सा महादेवी हा हा इत्युक्त्वा मूर्च्छिताऽभवत्। तद्दृष्ट्वा दुःखाकुलेन राज्ञा परिजनेन च सा राज्ञी शीताम्बुमारुतैः शनैः शनैः समाश्वास्यत।

अथ रात्रौ तां सुस्थितां दृष्ट्वा स राजा द्वितीयया तारावल्या सह चन्द्रप्रासादमारोहत्। तत्र सुप्तायास्तस्याश्चलितवाससि देहे जाल-

पर्यैर्हिमांशोः कराः अपतन्। ततः क्षणात् प्रबुद्धा हा दग्धास्मीति-वादिनी सहसा शयनादुत्तस्थौ। किमेतदिति सम्भ्रान्तः स महीपालो विनिद्रः सहसोत्थाय तस्या अङ्गे विनिर्गतान् विस्फोटान् ददर्श। तत्-कारणञ्च पृच्छन्तं तं क्षितिपतिं तारावली प्रत्यवादीत् "ममाङ्गे पतितैरिन्दोर्मयूखैरेतत्कृतमिति।" एवमुक्तवत्याः क्रन्दन्त्याश्च तस्था-स्तादृशीमार्तिं समनुभूय क्षोणीपतिः स विह्वलाकुलधावितं तस्याः परि-जनमाजुहाव। आगतेन च तेन परिजनेन सजलैर्नलिनीदलैरस्याः स शय्यामकारयत्, अङ्गे च श्रीखण्डार्द्रविलेपनमदापयत्।

अथ बुद्ध्वा तावत् तारावलीवृत्तान्तं तृतीया तस्यावनिपतेः प्रिया मृगाङ्कवती तत्पार्श्वमागन्तुमना निजमन्दिरान्निर्ययौ। निर्गता तु सा निश्शब्दायां निशीथिन्यां नातिदूरे क्वापि गृहे व्यक्तं धान्यावघातजं मुसलध्वनिमशृणोत्। श्रुत्वैव हा मृतास्मीति ब्रुवाणा करौ धुन्वती च व्यथाक्रान्ता सा मृगलोचना मार्ग एव उपाविशत्। ततः प्रतिनिवृ-त्यैव परिजनेन स्वान्तःपुरं नीता सा रुदती शयनेऽपतत्। तत्र किमे-तदिति पर्युत्सुकः साश्रुस्तत्परिजनस्तस्या आलीनालिनी पद्मे इव किणा-ङ्कितौ करौ ददर्श। गत्वा च परिजनस्तथैव राज्ञे विज्ञापयामास। राजापि तत्रागत्य चिन्ताक्रान्तचित्तः किमेतदिति प्रियां पप्रच्छ। सापि पीडिता तं निजहस्तौ प्रदर्श्य व्याजहार "मुसलस्य नादे श्रुते मे करौ किणाङ्कितौ जाताविति।" ततः स द्रागेव द्वयोर्हस्तयोश्चन्दनविलेप-नादि दाहशमनं दापयामास। अद्भुतञ्च विषादमापेदे स महीमहेन्द्रः। एकस्याः पतता उत्पलेन क्षतमाहितं, द्वितीयस्याः शीतांशोः करैरेव दग्धा किलाङ्गयष्टिरेतस्यास्तृतीयस्यास्तु श्रुतमात्रेणैव मुसलशब्देन हस्तयोरी-दृशाः किणाः समुद्भूताः। हन्त! एतासां प्रेयसीनामेतादृशसौकुमार्य-कारणमत्यभिजातत्वं गुणोऽपि दोषायैव जातो ममाधन्यतया। एवं

चिन्तयतोऽन्तःपुरेषु च भ्रमतस्तस्य भूपतेः सा त्रियामा शतयामेव कृच्छ्रादियाय। प्रातश्च स राजा शल्यहर्तृभिर्भिषग्भिः सह तथा विधानमकरोत् यथा अचिरात् स्वस्थान्तःपुरः सन्निर्वृतोऽभवत्।

एवमेतामद्भुताङ्कथां कथयित्वांसस्थितः स वेतालस्तन्नेतारं त्रिविक्रमसेनं नृपतिं पप्रच्छ "हे राजन्! एतासु राज्ञीषु कतमाऽभिजाततमेति? जानन्नपि तथ्यं चेन्न व्याहरसि तदा पूर्वोक्तः स ते शापोऽस्तु।" तच्छ्रुत्वा स भूपतिः प्रतिव्याजहार, "मुसलेऽस्पृष्टेऽपि मुसलध्वनिश्रवणेनैव यस्याः करे किणा उद्गताः सैव सुकुमारतमा। इतरयोर्द्वयोस्तूत्पलेनेन्दुकरैश्च स्पर्शे सति व्रणविस्फोटा जातास्तेन ते पूर्वस्याः समे न।" एवमुक्तवतस्तस्य राज्ञोंऽसात् भूयः स वेतालः स्वमेव पदं ययौ। राजा च सुदृढनिश्चयस्तं तथैवानुससार।

(६)

यशोधनकथा

अथ राजा पुनः शिंशपामूलमुपेत्य वेतालञ्च तन्तथैव स्कन्धे कृत्वा प्रसह्य प्रचलितुमुपचक्रमे। तथा प्रस्थितञ्च तं भूपतिं स वेतालः स्कन्धतोऽब्रवीत्—हे राजन्! क्लमापहाराय तेऽपरां मनोहारिणीं कथां कथयामि, तां शृणु।

आसीत् पुरा गङ्गाकूलेऽखण्डधर्ममर्यादं कलेरगम्यं कनकपुरं नाम नगरम्। तस्मिंश्च यशोधन इत्यन्वर्थनामधेयो नरनाथोऽभवत्। विप्लवाम्भोधेर्वेलाद्रिरिव वीरोऽयं सततं क्षितिं ररक्ष। जगदाह्लादकश्चण्डप्रतापोऽखण्डमण्डलः स क्षोणीपतिश्चन्द्रार्कावेकीकृत्यैव नूनं निर्ममे विधिना। पापभीरुर्यशोलुब्धः शौर्यौदार्यमयोऽयं राजेति गुणान् गायति स्म तस्य जगतीजानेः प्रजागणः।

तस्य राज्ञो नगरे कश्चन महावणिक् प्रतिवसति स्म। आसीच्च तस्योन्मादिनीनामधेया सौन्दर्यसागरसमुद्भूतेवैका सुता। यो यो हि तामवलोकयति स्म स एव तद्रूपसम्पदा उन्माद्यति स्म। यौवनस्थायां च तस्यां तत्पिता स वणिक् राजानमुपेत्य विज्ञापयामास—"हे प्रभो! त्रैलोक्यरत्नभूता मम सुता प्रदेयास्ति। ताञ्च देवस्यानावेद्य नान्यस्मै दातुमुत्सहे। समस्ते भूतले देवो निखिलरत्नानां प्रभुरतस्तत्स्त्रीरत्नं स्वीकृत्य मामनुग्रहीतुमर्हति देव इति।"

एवं वणिग्वाक्यमाकर्ण्य स राजा तस्या उन्मादिन्याः सुलक्षणानि परीक्षितुं निजब्राह्मणान् सादरं प्रहितवान्। गत्वा च ते ब्राह्मणास्तां त्रैलोक्याद्भुतसुन्दरीं दृष्ट्वा सद्यः क्षोभमापुः। परन्तु ते क्षिप्रमेव धैर्यं लब्ध्वाऽचिन्तयन्। "प्राप्नुयादिमां सकललोकहृदयहारिणीमद्वितीयां सुन्दरीं चेद् राजा ततो ध्रुवं नो राज्यमवसीदेत्! एतन्मोहितचित्तो हि स किं राज्यमवेक्षेत। तस्मात् सुलक्षणेत्येषा क्षितिपायास्माभिर्नाख्येया।" इत्येवं सम्मन्त्र्य ते सर्वे राज्ञोऽन्तिकं जग्मुः। "देव! कुलक्षणा सेति" तैर्मृषोक्तः स राजा तां वणिक्सुतां नैव स्वीचकार। ततस्तस्य राज्ञ आज्ञया स वणिक् बलधराख्याय तत्सेनापतये तां प्रददौ। सापि निजभर्तृगृहे भर्त्रा समं सुखं न्यवसत्।

अथ गच्छति काले फुल्लकुन्दलतादन्तं मथिताम्बुजिनीवनं हेमन्तहस्तिनं हत्वा लसत्पुष्पमञ्जरीकेसरावलिः सहकाराङ्कुरनखो मधुकेसरी आजगाम। ततश्च नगरे वसन्तमहोत्सवं द्रष्टुं गजारूढो यशोधनो विनिर्ययौ। तत्र महाराजस्यागमनं सूचयितुं दत्तमुद्घोषडिण्डिमं श्रुत्वा परित्यागावमानिता सा उन्मादिनी तदा राज्ञे निजरूपं प्रादर्शयत्। मधुना मलयानिलैः संधुक्षितस्य मदनानलस्योद्गतां ज्वालामिव तां प्रेक्ष्य सद्यो विक्षुब्धोऽभवद् भूमिपतिः। तस्याश्च रूपं मनोभुवो जैत्रमस्त्रमिव हृदये गाढं प्रविष्टं निर्वर्णयन् क्षणान् मोहमुपगतः। पश्चाद्भृत्यैराश्वासितः प्राविशद् राजधानीम्। ललनाललामभूता का सेति राज्ञा पृष्टाश्च ते भृत्याः प्रागुपनतोज्झितां तां विज्ञापितवन्तः।

तत उन्मादिनी कुलक्षणेतिवादिनस्तान् विप्रान् देशान्निर्वास्योन्मना नृपतिरनुदिनन्तामेव दध्यौ। अहो जगन्नेत्रोत्सवे तस्या निष्कलङ्के मुखे सति कुतोऽयं जडात्मा निर्लज्जश्चन्द्रमा नित्यमुदेतीत्येवं सन्ततं तामेव स्मरन् स्मरानलपुटपाकेन पच्यमान इव दिने दिनेऽन्तः क्षीयते स्म

क्षितिपतिः सः। ह्रिया तापहेतुं निगूहमानश्च राजा पुनः पुनः साग्रहं पृच्छद्भ्यः आप्तेभ्यः कृच्छ्रेण सर्वं शशंस। अलं संतापेन, स्वाधीनां तां किं न भजसे इति तैरभिहितो धर्मभीरुः स नरपतिस्तन्नैवानुमेने। ततः स सेनापतिर्बलधरस्तच्छ्रुत्वा प्रभुमुपेत्य सद्भक्त इव चरणानतस्तमभ्यर्थयामास—हे देव ! दासस्त्री तव दास्येव न पराङ्गना। स्वयञ्चाहमेनां प्रयच्छामीति विचार्यैनां स्वीकुरु मद्भार्याम्। अथवेह देवकुले त्यजामि तां ततश्च देवकुलस्त्रियो ग्रहणे न ते दोष इति स्वसेनापतिना साग्रहमनुनाथ्यमानोऽपि पृथिवीपतिः सान्तःकोपं तमुवाच—"हे सेनापते ! राजा भूत्वाप्यहं कथमीदृशमधर्मं कुर्याम् ! उल्लङ्घितमर्यादे हि मयि को नामान्यो मर्त्यः स्ववर्त्मनि तिष्ठेत् ? भवन्मम भक्तोऽपि भवान् कथं माममुत्र महादुःखहेताविह क्षणसुखावहे पापे नियोजयति ? यदि च त्वं स्वधर्मपत्नीं विहास्यसि नाहं त्वां क्षमिष्ये। को नाम मादृशस्तादृशं धर्मविप्लवं सहेत ?" तदस्मादधर्माचरणान् मृत्युर्वरमित्युक्त्वा स नरनाथस्तं निषिषेध। उत्तमसत्त्वा हि लोके प्राणानपि त्यजन्ति न परं सत्पथम्। सुदृढनिश्चयः स राजा तथैव प्रार्थ्यमानानन्यानपि पौरजानपदान् निराचकार। एवञ्च क्रमेण तेनैव स्मरज्वरोष्मणा दन्दह्यमानः स यशोधनो यशोधरो यशःशेषतां ययौ। सेनापतिश्च प्रभोस्तथा देहपातमसहिष्णुरग्निं प्रविवेश। अनिर्वाच्यं हि भक्तानां चेष्टितम्।

एवं कुतूहलाकलितां कथामाख्याय स्कन्धस्थितो वेतालः त्रिविक्रमसेनं पार्थिवं पप्रच्छ—नृपते ! ब्रूहि, एतयोः सेनापतिमहीभृतोः कः सत्त्वेनाधिकः ? पूर्वोक्तसमयं स्मारितो मुक्तमौनो महीपतिस्तं प्रत्युवाच, —"तयोर्द्वयोर्महाराजः किलाधिकः सत्त्ववान्" इति। तदाकर्ण्य वेतालः साक्षेपमभाषत— "राजन् ! सेनापतिः स्वामतिप्रियां भार्यामपि भक्त्या

स्वामिनमुपानयत्, तस्मिंश्च पञ्चत्वमुपगते स आत्मानमग्निसादकरोत्। राजा त्वज्ञाततत्स्वभावस्तौ जघ्नाविति कथं नात्र स सेनापतिरभ्यधिकः ?" वेतालेनैवमुक्तः स नरेशो विहस्य प्रोवाच—"सत्यमेतत् तथापि नात्र किञ्चिच्चित्रञ् यत् स सेनापतिर्भक्त्या स्वाम्यर्थं सम्पादयितुं तथाकरोत्। अनुजीविनां प्राणैरपि स्वामिसंरक्षणं व्रतम्। राजानस्तु मदाध्माताः निरङ्कुशा गजा इव विषयोन्मुखा धर्ममर्यादाशृङ्खलां छिन्दन्ति। उत्सिक्तचित्तानां हि तेषामभिषेकाम्बुभिः सममखिलो विवेको विगलति। वृद्धोपदिष्ट-शास्त्रार्थ-रजो-मशक-मक्षिकाश्चल-च्चामरमारुतैरुद्धूय क्षिप्यन्त इव। आतपत्रेण नूनं सूर्यालोकेन साकं सत्यं निवार्यते। विभूतिवात्योपहृता दृष्टिश्च मार्गं नेक्षते। ते ते च जगद्विजयिनोऽपि नहुषादयो राजानो मारमोहितस्वान्तास्तां तां विपदमापुः। अयन्तावत् पृथिव्यामेकच्छत्रोऽपि सन् चपलया लक्ष्म्येव तयोन्मादिन्या क्षणं मोहितोऽपि धीरो धरणीधरः प्राणाँस्तत्याज न परम् अमार्गे पदं निदधे। अत एवासौ वसुधाधीशो धर्मवीरत्वाद् मेऽधिको मतः।"

इत्याकर्ण्य नृपस्य तस्य वचनं भूयस्तदंसस्थला—
द्वेतालः सहसा स्वमेव स पदं मायाप्रभावाद् ययौ।
राजाऽप्यन्वसरत्तथैव स पुनः सम्प्राप्तुमेतं जवा-
दारब्धे हि सुदुष्करेऽपि महतां मध्ये विरामः कुतः॥

(७)

विष्णुस्वामिकथा

ततस्त्रिविक्रमसेनस्तमेव शिंशपातरुं गत्वा पुनश्च वेतालमुपगम्य तमंसारोपितञ्चकार। गच्छन्तं च तं राजानं पथि वेतालोऽब्रवीत्—हे राजन्! साधुः सुसत्त्वस्त्वं तस्मादपूर्वामिमामपरां कथां शृणु।

आसीत् पूर्वमस्मिन् वसुमतीतले कुसुमपुराख्यनगरेश्वरो धरणीवराहो नाम धराधीशः। तस्य ब्राह्मणभूयिष्ठे राष्ट्रे ब्रह्मस्थलाभिधोऽग्रहार आसीत्। तत्र विष्णुस्वामी नाम द्विजः प्रतिवसति स्म। आसीच्च तस्य हविर्भुजः स्वाहेवाऽनुरूपा भार्या। तस्याञ्च तस्य क्रमाच्चत्वारस्तनयाः समुत्पन्नाः। अधीतवेदेषूत्क्रान्तशैशवेषु च तेषु दिवङ्गतं विष्णुस्वामिनं तद्भार्यानुजगाम। ततः सर्वेऽपि ते आनाथ्यदुःस्थिताः गोत्रजैः हृतसर्वस्वा मिथो मन्त्रयाञ्चक्रुः, "नास्तीहास्माकं गतिः तस्मादितो यज्ञस्थलाभिधे ग्रामे मातामहगृहं किं न व्रजाम।" एवं निश्चित्य भैक्ष्यावलम्बितजीवनास्ते चत्वारोऽपि प्रस्थिताः। बहुभिर्वासरैः प्रापुस्ते खलु मातामहगृहम्। तत्र च मातामहाभावाद् मातुलैर्दत्तसंश्रयास्तद्गृहे भुञ्जानाः स्वाध्यायपरास्तस्थुः। कालक्रमेण चाकिञ्चनास्ते भोजनाच्छादनादिषु मातुलानामवज्ञाभाजनतां जग्मुः।

ततः स्वजनकृतापमानहतात्मसु चिन्तातुरेषु च तेषु ज्येष्ठो भ्राता रहसीतरानब्रवीत्—भ्रातरः! किं क्रियते, सर्वं विधिरेव आचेष्टते;

पुरुषेणेह क्वचित् कदाचित् किंचिदपि कर्त्तुं न शक्यम्। अद्योद्वेगतो भ्राम्यन् पितृकाननमहं गतः। तत्र च त्रस्ताङ्गविपन्नस्थितं पुरुषमेकं भुवि अद्राक्षम्। तं दृष्ट्वा लिप्सुश्च तां गतिमचिन्तयम्, "धन्योऽयं य एवं दुःखसम्भारं विमुच्य विश्रान्तः"। एवं सञ्चिन्त्य तत्कालमेव मरणनिश्चयं कृत्वा वृक्षाग्रलग्नेन पाशेनात्मानमलम्बयमहम्। तथा कृत्वा यावच्च विसंज्ञस्य मेऽसवो न निर्यान्ति तावत् त्रुटितपाशोऽहं महीतले पतितोऽस्मि। लब्धसंज्ञश्च क्षिप्रं केनापि कृपालुना पुरुषेण पटवासैराश्वास्यमानमात्मानमपश्यम्। प्रोक्तश्चाहं तेन, "सखे! कथय, विद्वानप्येवं कथं खिद्यसे? सुकृतात् सुखं, दुष्कृतादेव च दुःखं भवतः। दुःखाद् यदि तवोद्वेगस्तर्हि सुकृतं समाचर। कथमात्मघातेन नारकं दुःखं कामयसे?" इत्येवं मां समाश्वास्य क्वाप्यन्तर्दधौ स पुमान्। अहं च तादृशं मरणप्रयत्नं परित्यज्य इहागतोऽस्मि। तदेवं विधौ नेच्छति मरणमपि न लभ्यते। इदानीञ्च तीर्थे तपसा तनुं तापयाम्यहं येन च पुनः दारिद्र्यदुःखभागी न भवेयम्। इत्युक्तवन्तं तं ज्येष्ठमनुजन्मानोऽब्रुवन्–"आर्य! अर्थाभावमुद्दिश्य कथं प्राज्ञोऽपि त्वं दुःखैर्बाध्यसे? किं न वेत्सि यदर्थानां शरदभ्रचला गतिः। आहृत्य यत्नेन रक्ष्यमाणापि श्रीः अन्तर्विरागिणी असन्मैत्रीव वाराङ्गनेव वा कस्य कदा स्थिरा? तन्मनस्विना मनुजेन स गुणः कथमप्युद्योगेनोपार्जनीयः येन हठाद् बद्धो मुहुरर्थहरिणः समाकृष्येत"। इत्येवं भ्रातृभिरुक्तो ज्येष्ठः क्षणाद् धैर्यमवलम्ब्य प्रोवाच,–"को गुणस्तादृगस्माभिरर्जनीयो भवेदिति।" ततस्ते सर्वे विचिन्त्य परस्परमवदन् "पृथ्वीं विचित्य किंचिद् विज्ञानं वयं शिक्षामहे।" एवं निश्चित्य पुनः समागमाय संकेतस्थानं निर्धार्य एकैकशस्ते चत्वारो भ्रातरः चतसृषु दिक्षु प्रययुः।

अथ केनचिदनेहसा ते पुनः संकेतस्थानमागत्य मिलिताः। किं केन शिक्षितमित्यन्योऽन्यमपृच्छन्। तेष्वेकोऽब्रवीत् "मया ईदृग् विज्ञानं शिक्षितं येन यस्य कस्यचिदपि प्राणिनोऽस्थिशकलं प्राप्य क्षणात् तदुचितं मांसं तस्मिन्नहमुत्पादयामि।" तस्यैतद् वचः श्रुत्वा द्वितीयोऽभाषत—"तत्रैव सञ्जातमांसेऽस्थिशकले तत्प्राणिनः लोमानि त्वचं च जनयितुमहं जाने।" तृतीयोऽवदत्—"एतादृग् विज्ञानमधिगतं मया येन जातमांसत्वग्लोमनि तत्रैवास्थिशकले तत्प्राण्यवयवाः स्रष्टुं शक्यन्ते।" ततश्चतुर्थोऽवादीत्—"उत्पन्नावयवाकृतिं तमेव प्राणैर्युक्तं कर्त्तुमहमवैमि।" एवं मिथः परामृश्य स्वस्वविज्ञानपरीक्षणाय ते चत्वारोऽपि भ्रातरः अस्थिखण्डान्वेषणायाटवीं ययुः। विधिवशात् ते तत्र सिंहस्यास्थिखण्डं लब्ध्वा अविज्ञातविशेषतया तदेव गृहीतवन्तः। तत एकस्तत्समुचितैर्मांसपिण्डैस्तदस्थिखण्डमयोजयत्। द्वितीयः तस्य त्वचं लोमानि चाजनयत्। तृतीयश्च तद्योग्यैरखिलैरङ्गैस्तदपूरयत्। चतुर्थस्तु सिंहीभूते तस्मिन् यावज्जीवितं सञ्चारयति तावदेवोद्धूतसटाभारोऽतिभैरवो दंष्ट्राविकरालवदनः खरतरनखाङ्कुरः केसरी उदतिष्ठत्। स च झटित्येव धावित्वा स्वोत्पादकान् तांश्चतुरोऽपि सोदरानवधीत्। तृप्तश्च वनं विवेश। एवं ते सर्वेऽपि द्विजाः सिंहनिर्माणदोषाद् विनष्टाः। दुष्टं हि जन्तुमुत्पाद्य कस्यात्मनि सुखं भवेत्! इत्थं यत्नादुपार्जितो गुणोऽपि विधौ वामे सति न सम्पत्तये परं विपत्तय एव भवति। मूले दैवे अविकृते प्रज्ञानवारिणा च सिक्ते नयालवालः पौरुषपादपः प्रायः फलति।

एवं तस्यां निशि मार्गे कथामाख्याय वेतालो राजानमपृच्छत्, "हे राजन्! पूर्वकृतं समयं स्मृत्वा वद तेषु चतुर्षु कस्तत्र सिंहनिर्माणे विशेषतोऽपराध्यति।" श्रुत्वैतन्महीपतिः मौनमालम्ब्य व्यचिन्तयत्—

"अयं पुनर्गन्तुमिच्छति, यातु, पुनरहमेनमानेष्यामि"; इति निश्चित्य प्रत्युवाच, "यस्तस्य सिंहस्य जीवदायी स एव तेषु पापभाक्। प्राणिविशेषमबुध्वैव यैर्युक्तिबलात् मांसत्वग्लोमगात्रनिर्माणं कृतं तेषामज्ञानात् नैव दोषः। येन तु सिंहाकारं दृष्ट्वापि विद्याप्रकाशनोत्केन तस्मिन् प्राणाः सञ्चारिताः तेनैव ता ब्रह्महत्या विहिताः।

राज्ञ एतद् वचनं निशम्य स वेतालः स्वस्थानं जगाम। राजापि तमेवानुसरन् शिंशपातरुमगात्। एतदवितथमेव यत्—

"कल्पान्तेऽप्यचलं कुलाद्रिविजयि स्थैर्यं हि धीरात्मनाम्।"



(८)

चन्द्रवतीकथा

ततस्तिमिरश्यामां ज्वलितचिताग्निलोचनां घोरां तां रजनिराक्षसी-मगणयन् वीरो राजा त्रिविक्रमसेनो भीषणे तस्मिन् श्मशाने तं शिंशपा-नोकहं गत्वा वेतालं च स्कन्धमारोप्य यावत् पुनर्गन्तुं प्रचक्रमे तावद् भूयः स वेतालो राजानमुवाच, "राजन्! अहं गमनागमनैरुद्विग्नोऽस्मि न परं त्वम्। तदेकं महाप्रश्नमिमं करोमि तं शृणु।"

आसीद् दक्षिणापथे धर्माभिधानः साधूनां धौरेयः कोऽपि माण्डलिको नरपतिः। तस्य महाकुलोत्पन्ना वरस्त्रीमौलिमालिका चन्द्रवती नाम मालवदेशजा भार्या बभूव। तस्य च तस्यां भार्यायामन्वर्थाभिधा लावण्यवती नाम सुता समुदपद्यत। प्रदेयायां च तस्यां सुतायां स धर्मभूपती राष्ट्रभेदिभिर्दायादैर्मिलितैरुद्वेजितोऽभूत्। ततस्तस्माद् देशात् पलाय्य निजभार्यया सुतया च सह गृहीतरत्नसञ्चयः शर्वर्यां श्वशुरा-स्पदं मालवं स्वैरं प्रस्थितः। प्रापच्च रात्रौ दयितया भार्यया दुहित्रा च सह भयङ्करां विन्ध्याटवीम्। परिश्रान्तः खिन्नश्च भूपतिस्तस्यां यथाकथञ्चिन् निशां निनाय।

अथ उत्क्षिप्ताग्रकरश्चोराटवीमेतां मा गा इति तं वारयन्निव दिवाकर उदयाचलमारुरोह। ततः कुशकण्टकैः क्षतचरणः पदाति-र्नृपतिः तस्यामटव्यां गच्छन् परेषां प्राणसर्वस्वहारिभिः पुरुषैरावृतां

धार्मिकैर्जनै रहितां कृतान्तनगरीमिव दुर्गां भिल्लानां पल्लिकामाससाद। तत्र वस्त्रैराभरणैश्च सहितं तं नृपं दूरादेव दृष्ट्वा विविधायुधा बहवः शबराः मोषितुमधावन्। तान् विलोक्य धर्मो नृपतिः भार्यां सुतां च जगाद,—"एतेषां म्लेच्छानां स्पर्शतः प्रागेव इतो वनं विशतम्।" एवं राज्ञा अभिहिता राज्ञी चन्द्रवती सुतया लावण्यवत्या सार्धं भयाद् वन-मध्यं विवेश। खड्गचर्मधरः शूरो नृपतिरभिमुखमायातान् तान् शर-वर्षिणोऽनेकान् शबरानवधीत्। ततस्तेन शबरपतिना आज्ञप्ता निखिला पल्ली युगपन्निपत्य प्रहारक्षतचर्माणं तमेककं नृपमहन्। गृहीताभरणे दस्युसैन्ये प्रयाते दूराद्भर्त्तारं निहतं विलोक्य वनगुल्मान्तरस्थिता राज्ञी चन्द्रवती दुहित्रा सह विह्वला पलायमाना दूरं गहनं वनं प्राविशत्।

तत्र मध्याह्नतापार्त्तास्विव छायास्वपि अध्वगैः सह शाखिनां शीतलानि मूलानि प्रविष्टासु क्वचित् कमलसरसस्तीरेऽशोकतरोस्तले शोकार्त्ता रुदती श्रान्ता च ससुता चन्द्रवती उपाविशत्। एतस्मिन्ने-वान्तरेऽभ्यर्णनिवासी कोऽपि महापुरुषः सपुत्रकोऽश्वारूढः सन् मृगयार्थं तद्वनमागच्छत्। चण्डसिंहनामा स महापुरुषः तयोः पांसुपतिते पद-पङ्क्ती दृष्ट्वा सिंहपराक्रमं नाम निजतनयमुवाच—"एते सुरेखे सुभगे पदपङ्क्ती अनुसृत्य यदि ते स्त्रियौ आप्नुयाव एकां तर्हि तयोः यथा-रुचि त्वं स्वीकुरुष्व।" इत्युक्तवन्तं तं सिंहपराक्रमः प्राह "यस्या इमौ सूक्ष्मौ पादौ सा मे भार्या भवतु। सा हि नूनं स्वल्पवया मम च समुचिता। या चेयं बृहत्पादानुमीयते ज्येष्ठवयाः सा च भवतो योग्या। एवं निजपुत्रस्य सिंहपराक्रमस्य वचः श्रुत्वा चण्डसिंहो जगाद—पुत्र! कैषा कथा? भवतो माता प्रत्यग्रं हि दिवं गता। तादृशे सुकलत्रे च गते काऽन्यत्र वासना? तच्छ्रुत्वा सिंहपराक्रमो निजपितरं चण्ड-सिंहमभाषत—तात! मा एवम्। भार्यारहितं हि गृहपतेर्गृहं शून्यम्।

अन्यच्च, मूलदेवोक्तं वचः किं न भवता श्रुतम्? यत्र गुणगणमण्डिता सौन्दर्यशालिनी मार्गविलोकिनी च कान्ता गृहिणी नास्ते कोऽजडस्तद-निगडं गृहसंज्ञकं दुर्गं प्रविशतीति। तत् तात! मम जीवितेन शापि-तोऽसि यदि तां द्वितीयां भार्यां न स्वीकरिष्यसि।

एतत्पुत्रवचः श्रुत्वा प्रतिपद्य च तत्, चण्डसिंहः पदपङ्क्तिमनु-सरन् शनैः शनैः ययौ। प्राप्य चैकं सरः तत्र लावण्यवत्यावभासितां मध्याह्ने तरुच्छायामुपाश्रितां मुक्तातारौघमण्डितामवदातया ज्योत्स्नया समलङ्कृतां नैशीं द्यामिव श्यामां तां राज्ञीं चन्द्रवतीं ददर्श। स-कौतुकः पुत्रेण सह तामुपाययौ। सापि तं दृष्ट्वा चोरशङ्किनी त्रस्ता सती समुत्तस्थौ। 'अम्ब! अलं त्रासेन। नैतौ स्तेनौ। सौम्याकृती सुवेषौ इमौ कौचित् नूनमाखेटाय इहागताविति' सुतया प्रोक्ता सा राज्ञी यावत् सन्देहेन दोलायते तावदश्वावतीर्णश्चण्डसिंहः ते उभे अब्रवीत्—"अलं सम्भ्रमेण। आवां मृगयार्थमिहागतौ। तन्नि-रातङ्के विश्वस्य वदतं के युवाम्, कुत इदमरण्यमुपागते, कथं चेह निर्मानुषे वने प्रविष्टे स्थः। रत्नप्रासादनिवासयोग्यं हि युवयोर्वपुः। कथं रुचिराङ्गणोत्सङ्गविचरणयोग्यौ युवयोश्चरणौ इमां कण्टकिनीं भुवं भ्रान्ताविति नितरां नौ मनसि व्यथा। चित्रमिदं यदेषा वातो-द्धूता धूलिर्युवयोरानने पतन्ती आवयोर्मुखं हतच्छायं करोति। चण्ड-दीधितेरुच्चण्डा एते किरणाः शिरीषकुसुमकोमलयोः भवत्योरङ्गयो-र्निपतन्तः नावत्यर्थं दहन्ति। तदात्मवृत्तान्तं ब्रूतम्। दूयते हि नौ हृदयम्। श्वापदावृतेऽस्मिन्नरण्ये युवयोः स्थितिं द्रष्टुं न शक्नुवः।" इत्येवं चण्डसिंहेन प्रोक्ता सा राज्ञी शनैः निःश्वस्य लज्जाशोकाकुला तस्मै स्वं वृत्तान्तमवर्णयत्। ततो निःस्वामिकां तां ज्ञात्वा समाश्वास्य च मधुरैर्वाक्यैरनुरञ्जयन् चण्डसिंहः सात्मजां तां स्वीचकार। सपुत्र-

श्चण्डसिंहो वाजिनोः पृष्ठमारोप्य ते कुबेरपुरीसमृद्धां निजां वसतिं निनाय। सापि राज्ञी जन्मान्तरगतेव विवशा नृपस्य प्रस्तावं परममाह। किं वा करोतु अनाथा कृच्छ्रपतिता स्त्री विदेशे ?

ततः चण्डसिंहसुतः सिंहपराक्रमः सूक्ष्मपदत्वात् तां राज्ञीं चन्द्रवतीं निजभार्यां व्यधात्। चण्डसिंहश्च तत्सुतां लावण्यवतीं नृपकन्यकां पादयोर्बृहत्त्वात् पत्नीरूपेण जगृहे, यतः सूक्ष्मबृहत्पादमुद्राद्वयविलोकनात् प्रागेव ताभ्यां तथा प्रतिपन्नमासीत्। को नाम सत्यमतिवर्त्तेत ?

एवं पादविपर्यासात् तयोः पितापुत्रयोस्ते दुहितामातरौ भार्ये भूत्वा तदा श्वश्रूस्नुषे जाते। कालेन च तयोर्द्वयोस्ताभ्यां पुत्राः दुहितरश्च क्रमाज्जज्ञिरे। इत्थं तौ चण्डसिंहसिंहपराक्रमौ लावण्यवतीं चन्द्रवतीं च प्राप्य तत्र तस्थतुः।

एवं कथामाख्याय स वेतालस्तं त्रिविक्रमसेनं नृपतिं पुनः पप्रच्छ—

"तयोर्मातादुहित्रोर्ये पुत्रपित्रोस्तयोर्नृप !
सकाशाज्जन्तवो जाता क्रमादुभयपक्षयोः॥
ज्ञात्वेदं ब्रूहि मे तेषामन्योन्यं के भवन्ति ते।
पूर्वोक्तः सोऽत्र शापस्ते जानानश्चेन्न वक्ष्यसि॥"

एतद् वेतालवचः श्रुत्वा बहुधा विमृशन्नपि स राजा यदा तन्न बुबुधे तदा तूष्णीमेव प्रययौ। ततस्तदंसशिखरस्थितः स वेतालः प्रश्नोत्तरप्रदानेऽसमर्थं दृष्ट्वा राजानं हृदि हसन् समचिन्तयत्—अयं राजा महाप्रश्नमिमं समाधातुमसमर्थः तेनैवं तूष्णीं व्रजति। न चायं मां प्रतारयितुं शक्नोति पूर्वोक्तशापभयात्। अहो महान् सत्त्वराशिरयम्। तदद्य तं दुरात्मानमुपायतो वञ्चयित्वा भाविनीं तत्सिद्धिं भाविकल्याणेऽस्मिन् राजनि निवेशयामीत्यालोच्य स वेतालस्तं राजानमलपत्—राजन् ! त्वं कृष्णनिशाघोरेऽस्मिन् श्मशाने गतागतैरेभिः क्लिष्टोऽपि

मुखीव दृश्यसे, न च कोऽपि ते विकल्पोऽस्ति। तत्तेऽनेन आश्चर्यकरेण धैर्येणाहं तुष्टोऽस्मि। इदानीमेतं शवं नय, अमुतोऽहं निर्गच्छामि। इदं च यत्तव हितं वचो वच्मि तच्छृणु, तथैव च कुरु। यस्यार्थे भवता एतन्नरकलेवरमानीतं स कुभिक्षुः मामस्मिन् समाहूय अर्चिष्यति। स शठस्त्वामेव च उपहारीकर्त्तुमिच्छुः भूमावष्टाभिरङ्गैः प्रणामं कुरु इति वक्ष्यति। प्राक् त्वमेव मे तावत् तद् दर्शय तथैवाहं करिष्यामीति त्वया स श्रमणो वक्तव्यः। ततो भूमौ निपत्य यावदेव स ते प्रणामं दर्शयिष्यति तावत् त्वमसिना तस्य शिरः छिन्द्याः। ततः तस्य या विद्याधरैश्वर्यसिद्धिः वाञ्छिता तां त्वं प्राप्स्यसि। अन्यथा स भिक्षुस्त्वामुपहारीकृत्य स्वाभीष्टां सिद्धिं प्रतिपत्स्यते। एतदर्थमत्र मया तवेयच्चिरं विघ्नो विहितः। तत्ते सिद्धिरस्तु, गच्छेत्युक्त्वा स वेतालः तस्यांसपृष्ठस्थितात् प्रेतकायान् निर्गत्य ययौ।

अथ स नृपतिरेवं प्रीतस्य वेतालस्य वाक्यात् क्षान्तिशीलं तं श्रमणं स्वाहितकरं मत्वा तं शवं गृहीत्वा प्रहृष्टस्तद्वटतरुतलं प्रति प्रतस्थे।

(कथोपसंहारः)

वेतालसिद्धिः

ततस्त्रिविक्रमसेनो भूपतिः शवं स्कन्धेन वहन् क्षान्तिशीलस्य तस्य भिक्षोरन्तिकञ्जगाम। गत्वा च तत्र कृष्णपक्षक्षपायां रौद्रतरे श्मशाने तरुमूलस्थितमेकाकिनं मार्गाभिमुखमवलोकयन्तन्तन्ददर्श। रुधिरलिप्तस्थले गौरेणास्थिचूर्णेनावलिखिते विन्यस्तपूर्णशोणितकुम्भे प्रदीपितमहातैलप्रदीपे कृतपार्श्वस्थहुतवहहोमे सम्भृतोचितसम्भारे कृतस्वाभीष्टदैवतपूजने च मण्डले समुपविष्टं तं भिक्षुं स राजा उपागात्। भिक्षुरपि स्कन्धारोपितशवं तं विलोक्य हर्षादुत्थाय प्रोवाच—"महाराज! भवता मे दुष्करः किल महाननुग्रहो विहितः। क्व भवादृशाः, क्व चेयं चेष्टा, क्व चेदृशौ देशकालौ। सत्यमेव भवन्तं कुलभूभृतां मुख्यमाहुः यत आत्मानपेक्षेण भवता एवं मदर्थः साध्यते। बुधैरेतदेव महतां महत्त्वमुच्यते यत्प्राणानामत्ययेऽपि ते प्रतिपन्नान्न प्रविचलन्ति। एवं ब्रुवन् स भिक्षुस्तस्य महीपतेः स्कन्धात् तं शवमवतारयामास। स्नापयित्वा च तं बद्धमाल्यं विधाय तस्य मण्डलस्यान्तः स्थापयामास। ततो भस्मावलिप्तगात्रः केशयज्ञोपवीती प्रावृतप्रेतकर्पटो भूत्वा क्षणं ध्यानमग्नः स्थितः। मन्त्रध्यानबलाच्च तस्मिन् नृकलेवरे तं वेतालं प्रवेश्य स भिक्षुः क्रमात् पूजयामास। तस्मै कपालार्घपात्रेणार्घ्यं ददौ। सुनिर्मलैर्नरदन्तैः पुष्पं, सुगन्धि च

विलेपनं, मानुषनेत्रैर्धूपं तथा मांसैर्बलिं दत्वा, पूजां समाप्य, पार्श्वस्थितं राजानमुवाच—"अस्मै मन्त्राधिराजाय भूमौ निपत्याष्टभिरङ्गैः प्रणामं कुरु येन वरप्रदः एष तेऽभिप्रेतसिद्धिं ददातु"। एतच्छ्रुत्वा स्मृतवेतालवचनः स नरनाथस्तं भिक्षुमब्रवीत्—"भगवन्! नाहमेतादृशं प्रणामं कर्त्तुं जानामि तत्पूर्वं भवान् मे प्रदर्शयतु तथैव चाहं करिष्यामीति।" ततः प्रणामप्रकारं प्रदर्शयितुं यावत् स भिक्षुर्भूमौ पतितस्तावदेव स राजा खड्गप्रहारेण तस्य शिरश्चिच्छेद। तस्मै वेतालाय तस्य शिरः खड्गाकृष्टञ्च हृत्कमलं ददौ। ततः परितः परं प्रीतैर्भूतप्रेतगणैः साधुवादे दत्ते तुष्टः स वेतालो नरकलेवरात् तं नृपमब्रवीत्—"राजन्! अस्य भिक्षोर्विद्याधरेन्द्रत्वमभीप्सितमासीत्तद्भूमिसाम्राज्यभोगान्ते ते भविष्यति। त्वं मया भृशं क्लेशितोऽसीति यथाभीष्टं कमपि वरं वृणीष्व।" इत्युक्तवन्तं तं वेतालं नृपालः प्रत्यवादीत्,—"त्वं चेत्प्रसन्नस्तदा को नामाभिमतो वरो न मे सिद्धः। तथाप्यमोघवचनत्वाद् भवतः, इदमभ्यर्थये—"नानाख्यानमनोरमा इमाश्चतुर्विंशतिः प्रश्नकथाः समाप्तिगा च पञ्चविंशतितमा सर्वा भूतले ख्याताः पूजनीयाश्च भवन्तु।" एवं तेन राज्ञा समभ्यर्थितो वेतालो जगाद, "राजन्! एवमस्तु। विशेषञ्च ते कथयामि शृणु। एषा कथावली वेतालपञ्चविंशतिकाख्यया भूतले ख्याता पूज्या मङ्गलकारिणी च भविष्यति। योंऽशमात्रमप्यस्याः सादरं कथयिष्यति यो वा श्रोष्यति स सद्य एव मुक्तपापो भविष्यति। यत्र चैषा कीर्तयिष्यते तत्र यक्षरक्षोवेतालकूष्माण्डडाकिनीप्रभृतयो न प्रभविष्यन्ति।" इत्युक्त्वा स वेतालस्तस्मान्नरकलेवरान्निर्गत्य योगमायया यथाभिमतं धाम ययौ।

अथ तस्मिन् राज्ञि संतुष्टो महेश्वरः सुरैः सह तत्र प्रादुरभूत्, प्रणतञ्च तं राजानमादिदेश। "वत्स! साधु विहितं यत्त्वयायं

कूटतापसोऽद्य हतः। आदौ त्वमेव मया स्वांशतोऽसुराणां, विनाशाय विक्रमादित्यरूपेण सृष्टोऽभूः। अधुना च दुर्वृत्तकूटतापसनाशाय स एव त्वं पुनरपि त्रिविक्रमसेनाख्यो वीरो भूपतिः सृष्टः। त्वञ्च सद्वीपपातालां महीं वशे कृत्वा अचिराद् विद्याधराणामधिराजो भविष्यसि। तत्र चिरं दिव्यान् भोगान् भुक्त्वा तत उद्विग्नः सन् स्वेच्छयैव तांस्त्यक्त्वा अन्ते ममैव सायुज्यं प्राप्स्यसीति नात्र संशयः। अपराजितनामानमेतं मे खड्गं गृहाण। अस्य प्रसादात् त्वं यथोक्तं सर्वं लब्धासे" इत्युक्त्वा तत् खड्गरत्नं तस्मै महीभृते दत्वा वाक्पुष्पैस्तेनाभ्यर्चितो भगवान् ससुरस्तिरोदधे।

अथ निखिलं निजकार्यं समाप्तं दृष्ट्वा प्रभातायाञ्च विभावर्यां स त्रिविक्रमसेनः स्वपुरं प्रतिष्ठानं प्रविवेश। तत्र विततोत्सवाभिः प्रकृतिभिरभिनन्दितः क्ष्मापः स्नानदानगिरिशार्चननृत्तगीतवाद्यादिभिरखिलं तद्दिनमनैषीत्।

अल्पैरेव च वासरैः स नृपतिः शार्वस्य वीर्यादसेः
सद्वीपां सरसातलाञ्च बुभुजे निष्कण्टकां मेदिनीम्।
सम्प्राप्याथ हराज्ञया सुमहतीं विद्याधराधीशतां
भुक्त्वा तां सुचिरञ्जगाम भगवत्सायुज्यमन्ते कृती॥

इति



Other Works by Dr. Surendra Natha Shastri

1. Kalpa-lata, a Sanskrit Commentary on Kalidasa's Vikramorvasiyam. (Nirnaya Sagara Press, Bombay)

2. Hindi Translation of Sri K. M. Munshi's "Jai Somanatha" from original in Gujarathi. (Rajkamala Prakashana, Delhi.)

3. Meghaduta of Kalidasa. Edited with Notes & Introduction. (Oriental Book Agency, Poona).

4. Madhyama-Vyayoga of Bhasa. Edited with Notes & Introduction. (Bharati Prakashana Mandir, Delhi.)

5. Naitika Nibandha Mala. In Hindi. (Laksmi Vilasa Press Ltd. Indore.)

6. A Brief Note on Sanskrit Compounds. (Laksmi Vilasa Press Ltd.)

7. Kshamaika-Vimshatih. A Sanskrit Poem. (Laksmi Vilasa Press Ltd.)

8. Vaidika Pratima Pujana Vichara. In Hindi. (Laksmi Vilasa Press Ltd.)

9. Sahitya Lahari Dipika—(National Book Depot, Agra).

0. Granthalaya-Sastra Ki Bhumika. In Hindi. (University Press, Delhi.)

1. Laws and Practice of Sanskrit Drama (Thesis approved for the Degree of "Doctor of Philosophy" in the University of Allahabad.)....In Press.